वर्षम्-९

ISSN : 975-2676

अङ्कः-३५

# संस्कृतवार्ता

## राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५२४२ वैक्रमाब्दः २०७३ पौष शुक्ल ३ - चैत्र शुक्ल ४ शकः १९३८-३९ जनवरी २०१७ - मार्च २०१७

### कुलपतिवाक्

**अयं यज्ञो विश्वस्य भुवनस्य नाभिः।** अथर्व. (९.१०.१४)

(यह यज्ञ सारे संसार का केन्द्र है।)

राष्ट्रस्य विभिन्नेषु प्रदेशेषु राष्ट्रिय-संस्कृत-संस्थानस्य त्रयोदश परिसराः प्रवर्तन्ते। सर्वत्र परिसरेषु विद्याम् आराधयन्तः शिष्याः गुरवः च ज्ञानयज्ञम् अनुतिष्ठन्ति। अत्र ज्ञानयज्ञे संस्कृतनिष्ठा भारतीया ज्ञानविज्ञानसम्पद् आद्रियते। राष्ट्रं जागरयितुं, समाजम् उद्धर्तुं, लोकं पावयितुं सोऽयं संस्कृतज्ञानयज्ञः विश्वस्य केन्द्रं स्यादिति सङ्कल्पयामः।

**यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव बलवत्तरं भवति** इति छान्दोग्योपनिषत्। परिसरस्थाः छात्राः शिक्षकाः कर्मकराः च सम्भूय यज्ञं सम्पादयेयुः। संस्कृतयज्ञमयं कर्म कथं वा समाजोपकारकं करोति? कथं वा राष्ट्रधर्मम् उज्जीवयति? कथङ्कारं जगतीतले भारतस्य प्रतिष्ठां स्थापयति? सर्वमिदं 'विद्यया'-सम्यग्ज्ञानेन बलवत्तरं भवति। पवित्रेऽस्मिन् कर्मणि श्रद्धा योगः च सहकुरुतः। तदिदं बलवत्तरं लक्ष्यम् अस्मत्पुरतः जागरयति। संस्कृतवार्ता अमुं सन्देशं वहन्ती विशेषतः परिसरेषु प्रसरतु इति सङ्कल्पना। सेयं सन्देशात्मिका वाणी सर्वतोषकरी न भवत्येव। तथापि स्फूर्तिमत्सु युवच्छात्रेषु उत्साहं जनयेदिति भावयामः।

परीक्षानन्तरं नूतनसत्रं प्रविशतां परिसरच्छात्राणां कृते स्पन्दते मे हृदयम्। भोः सुहृदः! परिसरेषु अधीयानाः, अमृतस्य पुत्राः संस्कृतच्छात्राः! **वयं राष्ट्रे जागृयाम** इत्यस्तु अस्माकं सङ्कल्पः। वैदिकपरम्पराम् अनुसरामः। का नाम वैदिकपरम्परा?इति जिज्ञासायां पुरतः समायन्ति क्रान्तदर्शिनः तपस्विनः अत्रि-अगस्त्य-भरद्वाज-वसिष्ठ-विश्वामित्रादयः। अपि च प्रयोगनिकषेण वेदनिष्ठां ज्ञानविज्ञानगर्भितां शास्त्रपरम्परां प्रसारिताः कणाद-कपिल-गौतम-पाणिनि-पतञ्जलिप्रभृतयः ऋषयः। मध्वशङ्कर-रामानुजप्रभृतयः आचार्याः। वाल्मीकि-व्यास-भास-कालिदास-प्रभृतयः कवीश्वराः।

**अहं राष्ट्रस्याभिवर्गे निजो भूयासमुत्तमः।** (अथर्व.)

स्वपुरुषार्थेन विकासोन्मुखे राष्ट्रमण्डले श्रेष्ठो भवेयम्, अग्रे सरेयम्, उत्तमः च स्याम् इति मनीषया सम्भूय प्रवर्तामहे। अयमस्माकं युगः, भवन्तः एव युगपुरुषाः इति संस्कृतवार्ता प्रतीक्षते।

**'ईन्धानास्त्वा शतं हिमम् ऋधेम'** - (अथर्व.)

*–परमेश्वरनारायणशास्त्री*



राजीवगान्धीपरिसरस्य रजतमहोत्सवम् उद्घाटयन्तः अनन्तश्रीविभूषिताः श्रीभारतीतीर्थमहास्वामिनः



राजीवगान्धीपरिसरस्य रजतमहोत्सवे भाषमाणः मानवसंसाधनविकासमन्त्रालयराज्यमन्त्री डॉ. महेन्द्रपाण्डेयमहोदयः



नाट्यमहोत्सवे दीपप्रज्वालनं विदधानः प्रो. कुलदीपचन्द अग्निहोत्रिमहाभागः

**मुख्यपरामर्शदाता**

प्रो. परमेश्वरनारायणशास्त्री

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**

प्रो. सुब्रह्मण्यशर्मा

प्रो. मनोजकुमारमिश्रः

प्रो. सुकान्तकुमारसेनापतिः

**सम्पादकः**

डा. मधुकेश्वरभट्टः

'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायं, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

संस्थानस्य जालपुटेऽपि संस्कृतवार्ता द्रष्टुं शक्यते-
**www.sanskrit.nic.in**

**संस्कृतवार्ता**

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

ISSN : 975-2676

प्रकाशकः

कुलसचिवः

**राष्ट्रियसंस्कृतसंस्थानम्**

(राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः, भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058

011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

## प्रतिस्पन्दः




राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकी वार्तापत्रिका संस्थानस्य परिसराणाञ्च वार्तां बिभ्राणा इयं संस्कृतभाषा-संवर्धनाय राष्ट्रियसंस्कृतसंस्थानस्य योगदानम् आविष्करोति।

–दिनेशः, उत्तरप्रदेशः




## समाचरितं गणतन्त्रपर्व

२६.०१.२०१७ दिनाङ्के सोल्लासं गणतन्त्रदिवसः समनुष्ठितः मुख्यालये। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः परमेश्वरनारायणशास्त्रिमहोदयः ध्वजोत्तोलनं व्यदधात्। अस्मिन् गणतन्त्रपर्वणि साधितस्य साधनीयस्य च विषयस्य स्मरणं विधाय अग्रे सरामः साधयामश्च। भारतं विश्वस्य अग्रेसरं करिष्यामः इति अवादीत्।

**वृणुते हि विमृश्यकारिणं**
**गुणलुब्धाः स्वयमेवसम्पदः।**
–किरात २.३०

**सत्यं त्वं वद धर्ममाचर कृधा मा च प्रमादं क्वचित्**
**कर्तव्ये गुरवस्त्वयाप्यतिथयः पूज्याः परं मातरः।**
**निन्द्यं मा कुरु कर्म पूजय धिया श्रेष्ठान् ह्रिया श्रद्धया**
**भीत्या तत्पदवीमनुव्रज गुरुशिष्यं प्रशिक्षेदिति।।**

(वेदान्तमुक्तावली)

A Guru must teach his Sisya to :- speak the truth, follow the right path, never neglect self duties, honour Gurus & Guests, honour one's Mother the most, honour great people wholeheartedly, modestly, faithfully & respectfully and to follow in their footsteps.

## सम्पन्नः चतुर्दशः अन्तःपरिसरीयनाट्यमहोत्सवः



नाट्यमहोत्सवे अतिथिभिः सह दीपं प्रज्वलयन् कुलपतिवर्यः

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षम् अन्तःपरिसरीयनाट्यमहोत्सवः समायोज्यते। ऐषमः चतुर्दशः अन्तःपरिसरीयनाट्यमहोत्सवः २७.०२.२०१७ दिनाङ्कात् ०१.०३.२०१७ दिनाङ्कं यावत् दिल्लीकेण्ट-स्थानके विद्यमानस्य केन्द्रीयविद्यालयस्य सर्वपल्लीराधाकृष्णन्-प्रेक्षागृहे भव्यतया समपादि। राष्ट्रियसंस्कृतसंस्थानस्य देशस्य विविधप्रान्तेषु राजमानानां परिसराणां छात्रैः मनोहराणि संस्कृत-नाटकानि अभ्यनीयन्त। अस्य संस्कृतनाट्यमहोत्सवस्य उद्घाटनकार्यक्रमः २४.०२.२०१७ दिनाङ्के सम्पन्नः। उद्घाटनकार्यक्रमेऽस्मिन् मुख्यातिथित्वेन हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयस्य कुलपतिः प्रो. कुलदीपचन्द अग्निहोत्रिमहाभागः, विशिष्टातिथित्वेन तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिः प्रो.मुरलीधरशर्ममहाभागः, सारस्वतातिथित्वेन राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिचरः प्रो. वेम्पटि कुटुम्बशास्त्रिमहाभागः, अध्यक्षत्वेन राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वर-नारायणशास्त्रिमहोदयः च उपस्थितः अभूत्। प्रास्ताविकं विदधानः नाट्यमहोत्सवस्य संयोजकः प्रो. रमाकान्त पाण्डेयमहोदयः अवोचत् यत् राष्ट्रियसंस्कृतसंस्थानेन स्वकीयरङ्गयात्रायाम् अद्यावधि १५० नाटकानि मञ्चितानि अयम् उद्यमः केनापि विश्वविद्यालयेन न कृतः ऐदम्प्राथम्येन राष्ट्रियसंस्कृतसंस्थानेन विहितः इति। हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयस्य कुलपतिः प्रो. कुलदीपचन्द अग्निहोत्रिमहाभागः स्वतन्त्रताप्राप्त्यनन्तरं संस्कृतभाषायाः ह्रासता जाता। विद्यालयस्तरे स्नातकस्तरे स्नातकोत्तरस्तरे च संस्कृतस्य अध्यापनम् आङ्ग्लहिन्दीक्षेत्रीयभाषामाध्यमेन क्रियते नतु संस्कृतभाषया इति कारणात् संस्कृतभाषायाः ह्रासः समजनि। अद्य विश्वेस्मिन् संस्कृतभाषायाः महत्त्वं सर्वत्र प्रसरितं विद्यते। अतः संस्कृतपाठ्यक्रमस्य अध्यापनं संस्कृतभाषामाध्यमेनैव करणीयम् इति प्रावोचत्। संस्कृतं व्यावहारिकी भाषा स्यात् तदैव भारतवर्षं पुनः विश्वगुरुपदवीं प्राप्स्यति इति राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिचरः प्रो. वेम्पटि कुटुम्बशास्त्रिमहाभागः अगादीत्। आनन्दावाप्तिरेव नाटकस्य न केवलं प्रयोजनं किन्तु संस्कृतभाषासामर्थ्यजननमपि नाटकस्य मुख्यं प्रयोजनं विद्यते। उच्चारणम्, पदसम्पद्, भाषणम्, शैली चेति भाषायाः चत्वारि सोपानानि विद्यन्ते। तेषु उत्तमोत्तमा प्राञ्जलं शैली अवाप्तव्या चेत् अवश्यं नाटके अभिनयः कर्तव्यः अथवा नाटकं द्रष्टव्यम् इति तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिः प्रो.मुरलीधरशर्ममहाभागः अवादीत्। युवानः छात्राः नूतननाटकानां प्रयोगद्वारा अनुभवे नावीन्यं सम्पादयेयुः। रूपकाणाम् दर्शनेन अभिनयेन च संस्कृतभाषायाः उच्चारणशुद्धता भविष्यति। आधुनिकरूपकाणां प्रस्तुतेः इदं लक्ष्यं विद्यते यत् आधुनिकसमाजस्य परिस्थितिं जानीयुः आस्माकीनाः इति राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिमहोदयः अबूबुधत्।




नाट्यमहोत्सवे मञ्चासीनाः अतिथिप्रमुखाः

ततः परं भोपालपरिसरीयच्छात्रैः पूर्वरङ्गं प्रस्तुतम्। पूर्वरङ्गे प्रस्तोष्यमाणनाटकानां विषयवस्तु न्यरूपि। वेदव्यासपरिसरस्य छात्रैः छत्रपतिसाम्राज्यम् (१-५ अङ्काः), श्रीरणवीरपरिसरस्य छात्रैः छत्रपतिसाम्राज्यम् (६-१० अङ्काः), राजीवगान्धीपरिसरस्य छात्रैः पण्डित-राजीयम्, एकलव्यपरिसरस्य छात्रैः अङ्गुष्ठदानम्, गङ्गानाथझापरिसरस्य छात्रैः लीलाभोजराजम्, श्रीरघुनाथकीर्तिपरिसरस्य छात्रैः दाम्पत्य-कलहम्, श्रीसदाशिवपरिसरस्य छात्रैः रक्षाबन्धनम्, लखनऊपरिसरस्य छात्रैः मदनमोहनमालवीयकीर्तिमञ्जरीनाटकम्, गुरुवायूरपरिसरस्य छात्रैः संयोगितास्वयंवरम्, जयपुरपरिसरस्य छात्रैः प्रतापविजयम्, क.जे.सोमैयासंस्कृतविद्यापीठस्य छात्रैः स्नेहसौवीरम्, भोपालपरिसरस्य छात्रैः तण्डुलप्रस्थीयम् इति रूपकम् अभ्यनीयत।



नाट्यमहोत्सवे उद्घाटनभाषणं विदधानः प्रो. कुलदीपचन्द अग्निहोत्रिमहाभागः

नाट्यमहोत्सवस्य समापनकार्यक्रमः ०१.०३.२०१७ दिनाङ्के सम्पन्नः। सम्पूर्तिसमारोहे मुख्यातिथिपदं गुजरातस्थश्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. अर्कनाथचौधरी-महाभागः, सारस्वतातिथिपदं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिचरः प्रो. राधावल्लभत्रिपाठिवर्यः, अध्यक्षपदं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्रिवर्यः च अलमकार्षीत्। राष्ट्रियसंस्कृतसंस्थानेन अद्यावधि पञ्चाशताधिकैकशतं रूपकाणां प्रस्तुतिः विहिता इति अयं श्लाघनीयो विषयो विद्यते। नाटकेन भाषायाः परिष्कारः कौशलविकासश्च जायते इति श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो.अर्कनाथचौधरीमहाभागः अभिप्रैत्। अभिनयः अपि सरस्वत्याः आराधनं विद्यते। संस्कृतनाटकेन यादृशम् अनुभवं प्राप्नुमः तादृशम् अनुभवं पाश्चात्यनाट्यपरम्परया ज्ञातुं न प्रभवामः। पाश्चात्या अपि उत्काः सन्ति भारतीयनाट्यपरम्पराम्

अध्येतुम् इति राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिचरः प्रो. राधावल्लभत्रिपाठिवर्यः स्वाभिप्रायं प्राचीकटत्। नाटकस्य दर्शनेन प्राप्तस्य नूतनानुभवेन आस्माकं दोषाणां परिमार्जनं कर्तुं शक्नुमः। आगामिनि काले न केवलं दिल्लीनगरे किन्तु देशस्य भिन्नभिन्नप्रान्तेषु नाट्यमहोत्सवस्य आयोजनं कर्तुं प्रयत्नो विधीयते इति राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो.परमेश्वरनारायणशास्त्रिवर्यः अवादीत्। भोपालपरिसरस्य छात्रैः अभिनीतं तण्डुलप्रस्थीयम् इति रूपकं प्रथमस्थानं, गुरुवायूर–परिसरस्य छात्रैः अभिनीतं संयोगितास्वयंवरम् इति रूपकं द्वितीयस्थानं, राजीवगान्धीपरिसरस्य छात्रैः अभिनीतं पण्डितराजीयम् इति रूपकं तृतीयस्थानं च अवाप्नोत्। एकलव्यपरिसरस्य छात्रैः रघुनाथकीर्तिपरिसरस्य छात्रैः च अभिनीतम् अङ्गुष्ठदानम् इति रूपकं, दाम्पत्यकहलं च रूपकं प्रोत्साहनपुरस्कारं समाप्नोत्।



नाट्यमहोत्सवस्य समापनसत्रे
मञ्चासीनाः अतिथयः

| नाम | परिसरः | नाटकम् | पात्रम् | पुरस्कारः |
|---|---|---|---|---|
| धर्मेन्द्रसिंहः | वेदव्यासपरिसरः | छत्रपतिसाम्राज्यम् | नेताजी | प्रथमः |
| पवनकुमारः | वेदव्यासपरिसरः | छत्रपतिसाम्राज्यम् | शिवाजी | द्वितीयः |
| टेकचन्द्रः | वेदव्यासपरिसरः | छत्रपतिसाम्राज्यम् | बाजी | तृतीयः |
| दीपेन्द्रः | श्रीरणवीरपरिसरः | छत्रपतिसाम्राज्यम् | शिवराजः | प्रथमः |
| स्नेहा पाण्डेयः | श्रीरणवीरपरिसरः | छत्रपतिसाम्राज्यम् | राजमाता | द्वितीया |
| आशिष शर्मा | श्रीरणवीरपरिसरः | छत्रपतिसाम्राज्यम् | हिरोजी | तृतीयः |
| अहल्या ए.भट्टः | राजीवगान्धीपरिसरः | पण्डितराजीयम् | लवङ्गी | प्रथमा |
| रविशंकर भट्टः के.एस्. | राजीवगान्धीपरिसरः, | पण्डितराजीयम् | पण्डितराजजगन्नाथः | द्वितीयः |
| गुरुदत्त एस्.भट्टः | राजीवगान्धीपरिसरः | पण्डितराजीयम् | शहजहानः | तृतीयः |
| प्रियांका शर्मा | एकलव्यपरिसरः | अङ्गुष्ठदानम् | एकलव्यः | प्रथमाः |
| ब्रह्मचारी ओङ्कारनाथनन्दः | एकलव्यपरिसरः | अङ्गुष्ठदानम् | द्रोणाचार्यः | द्वितीयः |
| भास्कर बनर्जी | एकलव्यपरिसरः | अङ्गुष्ठदानम् | सूत्रधारः अर्जुनः च | तृतीयः |
| मंगलदेव त्रिपाठी | गङ्गानाथझापरिसरः | लीलाभोजराजम् | माकन्दकः, विदूषकः | प्रथमः |
| विपिन कुमार द्विवेदी | गङ्गानाथझापरिसरः | लीलाभोजराजम् | सूत्रधारः | द्वितीयः |
| योगेश चन्द्र थुवालः | गङ्गानाथझापरिसरः | लीलाभोजराजम् | भूरिदत्तः खरग्रामसामन्तः च | तृतीयः |
| लोकेश शर्मा | श्रीरघुनाथकीर्तिपरिसरः | दाम्पत्यकलहम् | मोहनः | प्रथमः |
| निशा शर्मा | श्रीरघुनाथकीर्तिपरिसरः | दाम्पत्यकलहम् | गोदावरी | द्वितीया |
| आयुष तिवारी | श्रीरघुनाथकीर्तिपरिसरः | दाम्पत्यकलहम् | मुकुन्दः | तृतीयः |

ना ट्य म हो त्स वः


नाट्यमहोत्सवे प्रस्तुतस्य पूर्वरङ्गस्य कानिचन दृश्यानि

| | | | | |
|---|---|---|---|---|
| लक्ष्मण पाढी | श्रीसदाशिवपरिसर: | रक्षाबन्धनम् | अम्भी | प्रथम: |
| राजेश दीक्षित: | श्रीसदाशिवपरिसर: | रक्षाबन्धनम् | पुरुषोत्तम: | द्वितीय: |
| चिन्मयी दास: | श्रीसदाशिवपरिसर: | रक्षाबन्धनम् | रजनी | तृतीया |
| विनोद शर्मा | लखनऊपरिसर: | मदनमोहनमालवीय-कीर्तिमञ्जरीनाटकम् | मदनमाहेन: | प्रथम: |
| अभिषेक कुमार चौबे | लखनऊपरिसर: | मदनमोहनमालवीय-कीर्तिमञ्जरीनाटकम् | मेनन मोतिलाल: च | द्वितीय: |
| दिव्यरञ्जन: | लखनऊपरिसर: | मदनमोहनमालवीय-कीर्तिमञ्जरीनाटकम् | सूत्रधार:, डेबवा च | तृतीय: |
| हरिप्रासाद् एस् | गुरुवायूरपरिसर: | संयोगितास्वयंवरम् | पृथ्वीराज: | प्रथम: |
| अनु. पि. एस्. | गुरुवायूरपरिसर: | संयोगितास्वयंवरम् | संयोगिता | द्वितीया |
| विष्णुदास् के.एस् | गुरुवायूरपरिसर: | संयोगितास्वयंवरम् | जयचन्द: | तृतीय: |
| सुयश शर्मा | जयपुरपरिसर: | प्रतापविजयम् | प्रतापसिंह: | प्रथम: |
| शिवनारायण महर्षि: | जयपुरपरिसर: | प्रतापविजयम् | सार्वभौम: | द्वितीय: |
| अभिषेक कुमार | जयपुरपरिसर: | प्रतापविजयम् | मानसिंह: | तृतीय: |
| निनदा ई.एम् | मुम्बईपरिसर: | स्नेहसौवीरम् | शबरी | प्रथमा |
| कविता जेना | मुम्बईपरिसर: | स्नेहसौवीरम् | सखी | द्वितीया |
| राजेश देसाई | मुम्बईपरिसर: | स्नेहसौवीरम् | मतङ्ग: | तृतीय: |
| आयुष दीक्षित: | भोपालपरिसर: | तण्डुलप्रस्थीयम् | निरञ्जन: | प्रथम: |
| अनुपम गर्ग: | भोपालपरिसर: | तण्डुलप्रस्थीयम् | पंचानन मिश्र: | द्वितीय: |
| प्रतिभा | भोपालपरिसर: | तण्डुलप्रस्थीयम् | भानुमति: | तृतीया |

| नाम | परिसर: | नाटकम् | पुरस्कार: |
|---|---|---|---|
| अहल्या ए.भट्ट: | राजीवगान्धीपरिसर: | पण्डितराजीयम् | सर्वोत्तमा अभिनेत्री |
| हरिप्रसाद् एस् | गुरुवायूरपरिसर: | संयोगितास्वयंवरम् | सर्वोत्तम: अभिनेता |
| | भोपालपरिसर: | तण्डुलप्रस्थीयम् | सर्वोत्तमाहार्यपुरस्कार: |
| | गुरुवायूरपरिसर: | संयोगितास्वयंवरम् | सर्वोत्तमप्रकाशव्यवस्थापुरस्कार: |
| | मुम्बईपरिसर: | स्नेहसौवीरम् | सर्वोत्तममञ्चसज्जापुरस्कार: |
| | राजीवगान्धीपरिसर: | पण्डितराजीयम् | सर्वोत्तमनिर्देशकपुरस्कार: |



नाट्यमहोत्सवे अभिनीतानां रूपकाणां कानिचन दृश्यानि




## कुलपतिदैनन्दिनी

०६.०१.२०१७ दिनाङ्कतः ०८.०१.२०१७ दिनाङ्कं यावत् उडुपिनगरे प्रचलिते अखिलभारतीय-संस्कृताधिवेशने उपस्थितिः।

०९.०१.२०१७ दिनाङ्के श्रीमातासंस्कृतमहाविद्यालये प्रचलितायां वेदविज्ञानविषयकराष्ट्रियसंगोष्ठ्यां उद्घाटकत्वेन उपस्थितिः।

१८.०१.२०१७ दिनाङ्कतः २२.०१.२०१७ दिनाङ्कं यावत् राजीवगान्धीपरिसरे प्रवृत्ते रजतमहोत्सवे उपस्थितिः।

१३.०२.२०१७ दिनाङ्के गुजरातराज्यस्थे सूरतनगरे प्रवृत्ते अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्य कार्यक्रमे उपस्थितिः।

१७.०२.२०१७ दिनाङ्के मुख्यालये प्रवृत्तायां Indian Language Technology कार्यशालायम् उपस्थितिः।

१९.०२.२०१७ दिनाङ्के इलाहाबादस्थे गङ्गानाथझापरिसरे प्रवृत्ते शोधच्छात्राणां प्रशिक्षणवर्गे उपस्थितिः।

२१.०२.२०१७ दिनाङ्के विश्वविद्यालयीयकुलपतीनाम् उपवेशने उपस्थितिः।

२७.०२.२०१७ दिनाङ्कतः ०१.०३.२०१७ दिनाङ्कं यावत् चतुर्दशे अन्तःपरिसरीयनाट्यमहोत्सवे उपस्थितिः।

०२.०३.२०१७ दिनाङ्कतः ०४.०३.२०१७ दिनाङ्कं यावत् राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः निरीक्षणासमितिसदस्यत्वेन गोस्वामिगणेशदत्त-महाविद्यालयस्य निरीक्षणम्।

१४.०३.२०१७ दिनाङ्के Maditation Centre (IIIM) इत्यस्य उद्घाटनकार्यक्रमे उपस्थितिः।

२१.०३.२०१७ दिनाङ्के G.I.A.C. उपवेशने उपस्थितिः।

२२.०३.२०१७ दिनाङ्के नवदेहलीस्थे योजनाभवने आयोजितायां राष्ट्रियंगोष्ठ्याम् उपस्थितिः।

## परिसरीयविदुषां क्रियाकलापाः उपलब्धयश्च

**प्रो. के.बी. सुब्बरायुडुः** – देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य प्राचार्यः प्रो. के.बी.सुब्बरायुडुः १८-२० जनवरी २०१७ इत्यवधौ NAAC इत्यस्य अभिमुखीकरणकार्यक्रमे भागम् अग्रहीत्। ११-१३ फरवरी, २०१७ इत्यवधौ अगरतलास्थ-स्वामिविवेकानन्दमहाविद्यालयेन आयोजितायाम् अन्ताराष्ट्रिय-सङ्गोष्ठ्यां मुख्यातिथित्वं सत्राध्यक्षत्वं च सम्पादितम्। १५.०२.२०१७ दिनाङ्के तेलङ्गानास्थ-बासरक्षेत्रे महर्षिसान्दीपनीवेदविद्याप्रतिष्ठानस्य नामितसदस्यत्वेन निरीक्षणं विहितम्। १७.०२.२०१७ दिनाङ्के भारतशासनस्य मानवसंसाधन-विकासमन्त्रालयस्य शासिकसंयुक्तसचिवेन सह परिसरभवननिर्माणविषये परिचर्चा विहिता। ०३.०३.२०१७ दिनाङ्के उत्तराखण्ड-संस्कृतविश्वविद्यालयस्य न्यायविभागेन आयोजितायां राष्ट्रियकार्यशालायां समापनसत्रे मुख्यातिथित्वेन सम्बोधनम्। ०६.०३.२०१७ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य जम्मूपरिसरेण आयोजितायां द्विदिवसीयायां दर्शनशास्त्रीयराष्ट्रियसंगोष्ठ्याम् उद्घाटनसत्रे मुख्यातिथ्यं कस्यचिदेकस्य सत्रस्य आध्यक्ष्यं च। राष्ट्रियसंस्कृतसंस्थाने १७.०३.२०१७ तमे दिनाङ्के भवननिर्माणसमितेः उपवेशने भागग्रहणं तथा च १९.०३.२०१७ तमे दिनाङ्के प्रबन्धसमितेः उपवेशने भागग्रहणम्। २१.०३.२०१७ दिनाङ्के मानवसंसाधनविकासमन्त्रालयस्य भाषिकसंयुक्तसचिवेन सह परिसरभवननिर्माणसमितेः उपवेशनम्। २७ फरवरी, २०१७ तः ०१ मार्च २०१७ पर्यन्तं नवदेहल्यां कौमुदीमहोत्सवे भागग्रहणम्।

**प्रो. बनमाली बिश्वालः** – जनवरीमासस्य व्याकरणविभागीयायाः राष्ट्रियशोधसङ्गोष्ठ्याः संयोजनम्। "महाभाष्ये लौकिकन्यायः" इति विषयं समधिकृत्य शोधपत्रवाचनम्। अपि च देशस्य नैकासु कार्यशालासु सङ्गोष्ठीषु च अध्यक्षरूपेण भागग्रहणम्।

**डॉ. आर. बालमुरुगन्** – जनवरीमासे न्यायविभागीयायाः सङ्गोष्ठ्याः संयोजकदायित्वं निरवहत् "वेदान्तशास्त्रे न्यायशास्त्रस्य प्रभावः" इति विषयं समधिकृत्य शोधपत्रं च प्रास्तौत्।

**डॉ. प्रफुल्लगडपालः** – २४-२५ जनवरी, २०१७ इत्यवधौ आयोजितायां साहित्यविभागीयायां राष्ट्रियसंगोष्ठ्यां संयोजकत्वेन सुष्ठुतया दायित्वं निरवहत्, तत्र अनूदितलघुकथाविषये शोधपत्रं च प्रस्तुतवान्। २४ जनवरी, २०१७ दिनाङ्के अनेन साहित्यविभागे 'समकालिक-संस्कृतसाहित्यस्य नवीनाः प्रवृत्तयः' इत्यस्मिन् विषये प्रो. अभिराजराजेन्द्रमिश्रमहोदयस्य विशिष्टव्याख्यानमपि समायोजितम्।

परिसरेण प्रकाशिताया: वार्तापत्रिकाया: 'रघुनाथवार्तावली' इत्यस्या: परामर्शदातृरूपेण पत्रिका सम्पादिता। अन्ताराष्ट्रियशोधपत्रिकाया: 'देवभूमिसौरभम्' इत्यस्या: सम्पादनकर्मणि अपि च परिसरस्य अन्तर्जालसम्पादने संरत:।

**डॉ. मनीष जुगरान: –** श्री रणवीरपरिसरे २५ दिसम्बरत: २ जनवरीपर्यन्तम् आयोजिते केन्द्रीयविद्यालयाध्यापकानां प्रशिक्षणवर्गे प्रशिक्षकत्वेन भागं गृहीतवान्। जनवरी मासस्य ६-८ दिनाङ्कं यावत् उडुपि नगरे संस्कृतभारतीद्वारा संस्कृतभारतं समर्थभारतम् इति विषये आयोजिते अखिलभारतीये अधिवेशने भागं गृहीतवान्। परिसरे आयोजितासु चतसृषु सङ्गोष्ठीषु शोधपत्राणि प्रस्तुतवान्। भोपालपरिसरे फरवरीमासस्य ११-१२ दिनाङ्कयो: आयोजितायां राष्ट्रियसंङ्गोष्ठ्यां "भाषाशिक्षणे तदधिगमे च ई-अधिगम:" इति विषये शोधपत्रं प्रस्तुतवान्। ऋषिकेशे संस्कृतच्छात्रसेवासमितिद्वारा आयोजिते सम्मेलने मुख्यवक्तृत्त्वेन संस्कृतशिक्षायां समस्या: तन्निवारणोपायाश्च इति विषये सम्बोधितवान्। उत्तराखण्ड-संस्कृत-अकादमीद्वारा मार्चमासे आयोजितायां राष्ट्रियसङ्गोष्ठ्यां 'मनुस्मृतौ गुरूशिष्यसम्बन्ध:' इति विषये शोधपत्रं प्रस्तुतवान्।

**डॉ. मुकेशकुमार: –** जनवरीमासस्य नवदशे दिनाङ्के शृङ्गेरीस्थे राजीवगान्धीपरिसरे समायोजिते रजतमहोत्सवे छात्रचरसंगोष्ठ्यां भागं गृहीत्वा "अद्यत्वे ज्योतिषशास्त्रीयमौल्यानां संरक्षणमिति" विषये स्वविचारम् उपास्थापयत्। जनवरीमासस्य एव २६-२७ दिनाङ्कयो: श्रीरघुनाथकीर्तिपरिसरे समायोजिताया: ज्योतिषशास्त्रीयराष्ट्रियसंगोष्ठ्या: संयोजकत्वेन दायित्वं निरवहत्। फरवरीमासस्य २७ दिनाङ्कत: मार्च १ दिनाङ्कपर्यन्तं देहल्यां प्रवृत्ते चतुर्दशे नाट्यमहोत्सवे श्रीरघुनाथकीर्तिपरिसरद्वारा प्रस्तुतस्य दाम्पत्यकलहम् इत्याख्यनाटकस्य निर्देशनदायित्वं निरवहत्। राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठेन १५ त: २४ मार्चपर्यन्तम् इलाहाबादस्थे श्रीगंगानाथझापरिसरे आयोजितायां ज्योतिषपाठलेखनसम्पादककार्यशालायां भागमग्रहीत्।

**श्री श्रीओमशर्मा –** १९.०१.२०१७ तमे दिनाङ्के 'राष्ट्रियप्रौद्योगिकी संस्थान' (N.I.T.U.K.) उत्तराखण्डे श्रीनगरे आयोजितायां कार्यशालायां विशिष्टवक्तृरूपेण 'भारतीय संस्कृति अब हिन्दी के आसरे' इति विषयमवलम्ब्य विशिष्टव्याख्यानं प्राददात्। २३.०१.२०१७ तमे दिनाङ्के रा.सं.सं. श्रीरघुनाथकीर्तिपरिसरे व्याकरणविषयिण्यां शोधसङ्गोष्ठ्यां "सिद्धान्तरत्नाकरकौमुदीमूलार्थविद्योतिनीदृष्ट्या ऋलृक् सूत्रविचार:" इति विषयमधिकृत्य शोधपत्रवाचनमकरोत्। २८.०१.२०१७ तमे दिनाङ्के रा.सं.सं. श्रीरघुनाथकीर्तिपरिसरे वेदविषयिण्यां राष्ट्रियशोधसङ्गोष्ठ्यां "सिद्धान्तरत्नाकरकौमुदीमूलार्थविद्योतिनीदृष्ट्या उदात्तादिस्वरविषयकं चिन्तनम्" इति विषयमधिकृत्य शोधपत्रवाचनमकरोत्। ३०.०१.२०१७ तमे दिनाङ्के रा.सं.सं. श्रीरघुनाथकीर्तिपरिसरे न्यायविभागीयायां राष्ट्रियशोधसङ्गोष्ठ्यां "सिद्धान्तरत्नाकरकौमुदीमूलार्थविद्योतिनीदृष्ट्या हेतुकरणपदार्थविमर्श:" इति विषयमधिकृत्य शोधपत्रं प्रस्तुतम्। २६.०२.२०१७ तमे दिनाङ्के रा.सं.सं. भोपालपरिसरे राष्ट्रियशोधसङ्गोष्ठ्यां विभक्त्यर्थविषयान्तर्गतम्-"साधकतमं करणामिति सूत्रस्य सिद्धान्तरत्नाकर-कौमुदीमूलार्थविद्योनीनिदृष्ट्या समीक्षणम्" इत्याख्यं शोधपत्रं प्रास्तौत्।

**प्रो. मिनतिरथ: –** श्रीसदाशिवपरिसरे फरवरीमासस्य ९, २२, २६, २७, दिनाङ्केषु वेदान्त-पुराणेतिहास-ज्योतिष-आधुनिक शिक्षाशास्त्र-विभागेषु समायोजितायां राष्ट्रियशोधसंगोष्ठ्यां चर्चासत्राध्यक्षापदमलंकृतवती सांख्ययोगविभागे १४ दिनाङ्के समायोजितायां राष्ट्रियशोधसंगोष्ठ्यां सम्मानितातिथिरूपेण च व्याख्यानं प्रस्तुतवती। मार्च मासि २८ दिनाङ्के श्रीजगन्नाथसंस्कृतविश्वविद्यालये वेदान्तविभागे यू.जि.सी. पक्षत: समायोजितायां राष्ट्रियसंगोष्ठ्याम् आधारपुरुष इति पदमलंकृत्य गीतातत्त्वोपरि व्याख्यानं प्रस्तुतवती। तस्मिन्नेव मासि २९ दिनाङ्के उत्कलराज्यस्य कटकनगरे रेभेन्साविश्वविद्यालयस्य संस्कृतविभागे यू.जी.सी. पक्षत: समायोजिताया: राष्ट्रियशोधसंगोष्ठ्या: चर्चासत्रे आध्यक्षं कृतवती।

**डॉ. मखलेशकुमार उपाध्याय: –** परिसरे जातेषु सर्वदर्शन-न्याय-व्याकरण-सांख्ययोग-पुराणेतिहास-धर्मशास्त्रविभागीयेषु विविधचर्चासत्रेषु भागग्रहणं कृत्वा शोधपत्रं प्रस्तुतवान्। २७-२८.०३.२०१७ दिनाङ्कयो: श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे जातायां राष्ट्रियसंगोष्ठ्यां श्रीमद्भागवते छन्दोविमर्श: इति शीर्षकान्वितं शोधपत्रं प्रास्तौत्।

**डॉ. कृष्णचन्द्रकवि: –** श्रीसदाशिवपरिसरस्य धर्मशास्त्र-पुराणेतिहास-सर्वदर्शन-व्याकरणसाहित्यविभागेषु समनुष्ठितायां राष्ट्रियसंगोष्ठ्यां भागग्रहणं कृत्वा शोधपत्रं प्रस्तुतवान्।

**डॉ.वेङ्कटरमण एस. भट्ट: –** मार्चमासस्य एकादशे दिनाङ्के त्रिशूरस्थे गुरुवायूरपरिसरे प्रवृत्तशिक्षाविभागीय-राष्ट्रियसङ्गोष्ठ्यां "वेदेषु मानवाधिकारशिक्षा" इति विषये शोधपत्रं प्रास्तौत्। तृतीयसत्रे सत्राध्यक्ष्यं निरवहत्। फरवरी मासस्य २८ मार्चमासस्य १, २ दिनाङ्केषु च

नवदेहल्यां प्रवृत्तनाट्यमहोत्सवे छात्रैस्सह मार्गदर्शकत्वेनागात्। मार्चमासस्य षोडशे दिनाङ्के राजीवगान्धीपरिसरे अध्यापकवाक्यार्थ-परिषदि "संस्कृतभाषाशिक्षणस्य सिद्धान्ता" इति विषयमधिकृत्य वाक्यार्थं व्यधासीत्। मार्चमासे परिसरे समायोजित IQAC सङ्गोष्ठ्यां पत्रं प्रास्तौत्। मार्चमासे परिसरे समायोजितसाहित्यविभागीयराष्ट्रियसङ्गोष्ठ्यां कालिदासकृतिषु शिक्षाशास्त्रविचारा इति विषये पत्रं प्रास्तौत्। मार्चमासे परिसरे प्रवृत्तान्ताराष्ट्रियसङ्गोष्ठ्यां कालिदासकृतिषु योगतत्वविचार इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्।

**डॉ. गणेशपण्डितः –** शिक्षाविभागे परिसरे प्रवृत्तराष्ट्रियसङ्गोष्ठ्यां भागग्रहणपूर्वकं शोधपत्रप्रस्तुतिः सत्रसञ्चालनं च कृतम्। वाक्यार्थपरिषदः सभायां शिक्षाशास्त्रे मनोमयं जगत्सर्वम् इति विषये शोधपत्रप्रस्तुतिः।

**प्रो. महाबलेश्वरभट्टः –** जनवरीमासे परिसरे प्रवृत्ते रजतमहोत्सवे भागः स्वीकृतः। फरवरीमासे परिसरे वेदान्तविभागीयराष्ट्रियसंगोष्ठ्यां भागः स्वीकृतः। तिरूपतिविद्यापीठे महामहोपाध्यायानां डॉ. सुब्रह्मण्यशास्त्रिवर्याणां रजतजयन्तीम् उपलक्ष्य प्रवृत्तायां "न्यायरक्षामणि" संगोष्ठ्यां भागः स्वीकृतः। मार्चमासे ११, १२, १३ दिनाङ्केषु विजयवाटिकायां माणिक्यशतमानोत्सवे सम्मान- कार्यक्रमे भागः स्वीकृतः। मार्चमासे परिसरे प्रवृत्तायाम् अन्ताराष्ट्रियगोष्ठ्यां पालिप्राकृतसंस्कृतयोगध्याने योगदानम् इति विषये भागः स्वीकृतः।

**डॉ. सूर्यनारायणभट्टः –** १८ एवं १९ दिनाङ्कयो फरवरी मासे परिसरे प्रवृत्तायां मीमांसाशास्त्रीयायां राष्ट्रियसङ्गोष्ठ्यां पत्रप्रस्तुतिः। आन्ध्रदेशस्थविजयवाटिकायां प्रवृत्तराष्ट्रियवाक्यार्थसभायां भागग्रहणम्। १८.०३.२०१७ एवं १९.०३.२०१७ दिनाङ्कयोः परिसरे प्रवृत्तायां साहित्यशास्त्रीयायां सङ्गोष्ठ्यां च पत्रप्रस्तुतिः। २२.०३.२०१७ तमे दिनाङ्के राजीवगान्धीपरिसरे अन्ताराष्ट्रियसङ्गोष्ठ्यां योगदर्शने पत्रप्रस्तुतिः कर्ममीमांसेति विषये।

**डॉ. राघवेन्द्रभट्टः –** जनवरी मासे परिसरे प्रवृत्ते रजतमहोत्सवे भागग्रहणम्। फरवरी मासे परिसरे प्रवृत्तायां वेदान्तशास्त्रियायां राष्ट्रियसङ्गोष्ठ्यां पत्रप्रस्तुतिः। फरवरीमासे परिसरे प्रवृत्तायां व्याकरणशास्त्रीय-राष्ट्रियसङ्गोष्ठ्यां पत्रप्रस्तुतिः। मार्चमासे प्रवृत्तायां साहित्यशास्त्रीय-राष्ट्रियसङ्गोष्ठ्यां पत्रप्रस्तुतिः।

**डॉ. सी.एस्.एस्.नरसिंहमूर्तिः –** जनवरीमासे परिसरस्य रजतमहोत्सवे भागो गृहीतः। रजतोत्सवसमये आयोजितायां राष्ट्रियसङ्गोष्ठ्यां भागग्रहणम्। गुरुवायूरुपरिसरे आख्यातार्थविचारसङ्गोष्ठ्यां पत्रप्रस्तुतिः। फरवरी ५, ६, ७ दिनाङ्केषु विशाखपट्टणे राष्ट्रियसङ्गोष्ठ्यां पत्रप्रस्तुतिः। फरवरी १८, १९ दिनाङ्कयोः परिसरे आयोजितायां विभागीयसङ्गोष्ठ्यां पत्रप्रस्तुतिः। फरवरी २० तः २३ दिनाङ्केषु संस्थानस्य मुख्यालये परीक्षाविभागे कार्यं कृतम्। ११.०३.२०१७ तमे दिनाङ्के विजयवाटिकायां मट्टुलपल्लिमाणिक्यशास्त्रिणां रजतजयन्त्युत्सवेषु आयोजितायां राष्ट्रियसङ्गोष्ठ्यां भागो गृहीतः। १५.०३.२०१७ शंकराचार्यविश्वविद्यालयीयराष्ट्रियसङ्गोष्ठ्यां भाषणं कृतम्।

**डॉ. आर्.बालाजी –** फरवरी ५, ६, ७ दिनाङ्केषु विशाखपट्टणे राष्ट्रियसङ्गोष्ठ्यां पत्रप्रस्तुतिः। फरवरी १८, १९ दिनाङ्कयोः परिसरे आयोजितायां विभागीयसङ्गोष्ठ्यां पत्रप्रस्तुतिः। फरवरी २० तः २३ दिनाङ्केषु संस्थानस्य मुख्यालये परीक्षाविभागे कार्यं कृतम्। ११.०३.२०१७ तमे दिनाङ्के विजयवाटिकायां मद्दुलपल्लिमाणिक्यशस्त्रिणां रजतजयन्त्युत्सवेषु आयोजितायां राष्ट्रियसङ्गोष्ठ्यां भागो गृहीतः। १५.०३.२०१७ शंकराचार्यविश्वविद्यालयीयराष्ट्रियसङ्गोष्ठ्यां भाषणं कृतम्।

**डॉ. वेङ्कटेशताताचार्यः –** जनवरी २२ दिनाङ्के वृत्तिविमर्शविषयकराष्ट्रियसङ्गोष्ठ्यां राष्ट्रियसंस्कृतसंस्थाने राजीवगान्धीपरिसरे पत्रप्रस्तुतिः। फरवरी १८ दिनाङ्के परिसरस्य मीमांसाविभागीयराष्ट्रियसङ्गोष्ठ्यां वाक्यप्रमाणमिति विषये पत्रप्रस्तुतिः। मार्च १२-१३ दिनाङ्कयोः विजयवाटिकायां मट्टुलपल्लिमाणिक्यशास्त्रिशतजयन्तीसभायाम् "अपूर्वसिद्धिः" विषये वाक्यार्थः। मार्च २२ दिनाङ्के मेलुकोटे संस्कृतमहाविद्यालये भगवद्रामानुजाचार्यसहस्राब्दसमारोहे समुदायाधिकरणमिति विषये वाक्यार्थः। मार्च २३-२४ दिनाङ्कयोः श्रीजगन्नाथसंस्कृतविश्वविद्यालये पुर्यां "संस्कृतज्ञानपरिष्कार" इति विषये शोधपत्रप्रस्तुतिः। मार्च २५ दिनाङ्के श्रीजगन्नाथसंस्कृत-विश्वविद्यालये पुर्यां "प्रत्यक्षं तत्कारणानि चेति विषये पत्रप्रस्तुतिः"।

**प्रो. का.इ.मधुसूदनः –** जनवरीमासे परिसरे आयोजितायां वृत्तिविमर्शविषयकसङ्गोष्ठ्यां पत्रप्रस्तुतिः। मार्च ४-५ दिनयोः न्यायविभागेन प्रचालितायां राष्ट्रियसङ्गोष्ठ्यां सत्राध्यक्षत्वं पत्रप्रस्तुतिश्च। १३.०३.२०१७ विजयवाटिकायां मट्टलपल्लिमाणिक्यशास्त्रिशताब्दपूर्ति-महोत्सवाङ्गसभायां सत्प्रतिपक्षविभाजकलक्षणमिति विषये विचारप्रस्तुतिः। २२.०३.२०१७ मेलुकोटे सर्वकारीयसंस्कृतमहाविद्यालये भगवद्रामानुजसहस्राब्दसमारोहे 'संस्कृतपञ्चानवकार्यक्रमे श्रीभाष्ये विचारप्रस्तुतिः।'

**डॉ. हरिप्रसादः के.** – १८.०२.२०१७ तमे दिनाङ्के परिसरे वेदान्तविभागेन सञ्चालितायां राष्ट्रियसंगोष्ठ्यां शोधपत्रं प्रास्तावि। ०४.०३.२०१७ तमे दिनाङ्के शिक्षाशास्त्रिविभागेन सञ्चलितायां राष्ट्रियसंगोष्ठ्यां "वेदान्ते शैक्षिकतत्वानि" इति विषयमवलम्ब्य शोधपत्रं प्रास्तावि। ०५.०३.२०१७ तमे दिनाङ्के मुक्तस्वाध्यायपीठेन सञ्चालितायां राष्ट्रियसंगोष्ठ्यां सत्राध्यक्षत्वेन भागोऽग्राहि। परिसरे सञ्चालितायां राष्ट्रियसंगोष्ठ्यां १७.०३.१७ तमे दिनाङ्के सत्राध्यक्षपदम् अलमकारि। १८.०३.२०१७ तमे दिनाङ्के परिसरे साहित्यविभागेन सञ्चालितायां राष्ट्रियसंगोष्ठ्यां शोधपत्रं प्रास्तावि।

**डॉ. गणेशईश्वरभट्टः** – १०.०२.२०१७ तमे दिनाङ्के वेदविज्ञानगुरुकुलम्, बेङ्गलूरु, इत्यत्र प्रचालितासु वार्षिकशैक्षिकपरीक्षासु निर्णायक आसीत्। ११.०२.२०१७ तमे दिनाङ्के तत्रैव राष्ट्रियसङ्गोष्ठ्यां पत्रं प्रास्तौत्। १७-१८.०२.२०१७ तमे दिनाङ्कयोः परिसरे प्रवृत्तायां वेदान्तविभागीयराष्ट्रियसङ्गोष्ठ्यां संयोजक आसीत्। १०-१२.०३.२०१७ दिनाङ्केषु विजयवाटिकामध्ये शास्त्रवाक्यार्थसभायां भगमगृह्णात्। तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे ०१.०३.२०१७ तः ०३.०३.२०१७ दिनाङ्केषु राष्ट्रियसंगोष्ठ्यां भागमगृह्णात्।

**डॉ. चन्द्रकलाकोण्डी** – फरवरिमासे प्रवृत्तायां व्याकरणसङ्गोष्ठ्यां भागग्रहणम्। मार्च-मासे प्रवृत्तायां साहित्यसङ्गोष्ठ्यां भागग्रहणम्। मार्च मासे प्रवृत्तायाम् अन्ताराष्ट्रियसङ्गोष्ठ्यां भागग्रहणम्।

**डॉ. चन्द्रकान्तः** – Conducted a National Seminar on Education, on 4, 5 March 2017, R.G.C. Paper Presented on National Seminar on Vratti Vichar in Shastras on 18, 19, 20 January 2017, R.G.C. Paper Presented in National Seminar of Vyakarna Shastras at R.G.C. Delivered a special speech on Indian Tradition at B.G.S. Degree College Junior on 18.03.2017. Invited as Chief Guest on 25.12.2016 in Shitiras Velidictory function at Udupi in connected with Sanskrit Mahadhiveshan 6, 7, 8 January 2017. Conducted as coordinator of International seminar on contribution of Pali Prakrit Sanskrit to Yoga and Dhyana from 21 to 23 March 2017. Internal examiner in practical exam-2017.

**प्रो. सुब्राय वि भट्टः** – २१ जनवरी २०१७ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरे वृत्तिविमर्श इति विषये राष्ट्रियसङ्गोष्ठ्यां 'गौणीवृत्तिः' इति विषये पत्रप्रस्तुतिः। फरवरी १८, १९ दिनाङ्कयोः राजीवगान्धीपरिसरे प्रवृत्तायां मीमांसाविभागीयराष्ट्रियसङ्गोष्ठ्यां समाख्यविषये पत्रप्रस्तुतिः। मार्च ११, १२, १३ दिनाङ्केषु - विजयवाटिकायां श्री माणिक्यशास्त्रिजन्मशतमानोत्सवनिमित्त-कशास्त्रसभायां भागः गृहीतः। मार्च १८, १९ दिनाङ्कयोः राजीवगान्धीपरिसरे साहित्यविभागीयराष्ट्रियसङ्गोष्ठ्यां "मीमांसकोऽयं कविकुलगुरुः" इति विषये पत्रं प्रस्तुतम्। मार्च-२३ दिनाङ्के राजीवगान्धीपरिसरे संस्कृतप्राकृतपालीभाषाणां योगविषयकं योगदानमिति विषयकान्ताराष्ट्रियसङ्गोष्ठ्यां सत्राध्यक्षत्वं निर्व्यूढम्।

**डॉ. नारायण वैद्यः** – ०४-०५.०३.२०१७ दिनाङ्के शिक्षाविभागे राष्ट्रियसङ्गोष्ठ्यां भागग्रहणं विषयप्रस्तावः च।

**प्रो. इन्दिरा पी.** – जनवरी मासे राजीवगान्धीपरिसरे आयोजितरजतमहोत्सवे स्पर्धासमायोजनं कृतम्। फरवरीमासे परिसरे प्रवृत्तायां व्याकरणराष्ट्रियसङ्गोष्ठ्यां पत्रप्रस्तुतिः। फरवरीमासे तिरुवनन्तपुरीस्थकेरलीयसर्वकारसंस्कृतकलालये राष्ट्रियसङ्गोष्ठ्यां पत्रप्रस्तुतिः। फरवरिमासे तिरुवनन्तपुरीस्थकेरलीयसर्वकारसंस्कृतकलालये ध्वन्यालोककार्यशालायां सम्पन्मूलव्यक्तिरूपेण कार्यं सम्पादितम्। मार्चमासे प्रवृत्तसाहित्यविभागीयराष्ट्रियसङ्गोष्ठ्यां पत्रप्रस्तुतिः आध्यक्ष्यं निर्व्यूढं च। फरवरीमासे व्याकरणशास्त्रीयसङ्गोष्ठ्यां पत्रप्रस्तुतिः। मार्चमासे प्रवृत्तज्योतिषविभागीयराष्ट्रियसङ्गोष्ठ्यां पत्रप्रस्तुतिः। मार्चमासे प्रवृत्तायाम् अन्ताराष्ट्रियसङ्गोष्ठ्याम् आध्यक्षं निर्व्यूढम्। फरवरीमासे J.C.B.M. कलाशालायां गीतादिनसमारोहे भागग्रहणं स्वीकृतम्।

**डॉ. चन्द्रशेखर भट्टः** – जनवरी मासस्य १२, २२ दिनाङ्कयोः परिसरे प्रवृत्तायां वृत्तिविषयकसङ्गोष्ठ्यां समायोजकः आसीत्। फरवरीमासस्य दशमे दिनाङ्के बेङ्गलूरुनगरस्थे वेदविज्ञानगुरुकुले परीक्षायां परीक्षकत्वेन भागो अग्राहि। ११.०२.२०१७ दिनाङ्के तत्रैव प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां पत्रप्रस्तुतिः। १८.०२.२०१७ दिनाङ्के परिसरे प्रवृत्तायां विभागीयसङ्गोष्ठ्यां पत्रप्रस्तुतिः। ०४.०३.२०१७ दिनाङ्के परिसरे प्रवृत्तायां शिक्षाशास्त्रीयविभागीयसङ्गोष्ठ्यां पत्रप्रस्तुतिः। १९.०३.२०१७ दिनाङ्के परिसरे प्रवृत्तायां साहित्यविभागीयसङ्गोष्ठ्यां पत्रप्रस्तुतिः। १९.०३.२०१७ दिनाङ्के परिसरे IQAC द्वारा समायोजितायां सङ्गोष्ठ्यां भागग्रहणम्। परिसरे १२ तः २३ मार्च पर्यन्तं प्रवृत्तायाम् अन्ताराष्ट्रियसङ्गोष्ठ्यां संयोजकत्वम्।

**डॉ. प्रमोद भट्टः –** जनवरी मासस्य २१, २२ दिनाङ्कयोः परिसरे प्रवृत्तायां वृत्तिविषयसङ्गोष्ठ्यां सहसंयोजकः आसीत्। १८.०२.२०१७ दिनाङ्के परिसरे प्रवृत्तायां सर्वनामत्वविचारः इति व्याकरणराष्ट्रियस्तरीयविभागीयसङ्गोष्ठ्यां 'किंशब्दविचारः' इति विषये पत्रं प्रास्तावीत्। २१.०३.२०१७ दिनाङ्के परिसरे प्रवृत्तायां "भारतीयदर्शनेषु शैक्षिकतत्त्वानि" इति राष्ट्रियसङ्गोष्ठ्यां "व्याकरणदर्शने शिक्षणपद्धतिः" इति विषये पत्रं प्रस्तावीत्। ब्रह्मश्री एम्.एम्.मद्दुपल्लिमाणिक्यशास्त्रिणां शतमानोत्सवं लक्षीकृत्य आन्ध्रप्रदेशस्य विजयवाटिकायां प्रवृत्तायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्याम् "एत्येधत्यूठ्सु इति विषये वाक्यार्थः कृतः।" १८.०३.२०१७ तमे दिनाङ्के Quality Enhancement of students in preserving and teaching shastra's इत्याख्यायां राष्ट्रस्तरीयपरिसरीयसङ्गोष्ठ्यां "व्याकरणशास्त्राध्ययने छात्राणां रूचिवर्धनोपायाः" इति विषये पत्रं प्रास्तावीत्। परिसरे मार्च २१ तः २३ मार्च पर्यन्तं प्रवृत्तायाः अन्ताराष्ट्रियसङ्गोष्ठ्याः सहसंयोजकत्वं निरवहत्। तत्रैव सगोष्ठ्यां "योगशास्त्रे मुद्राः" इति विषये पत्रं प्रास्तावीत्।

**डॉ. मुरलिकृष्ण टि. –** ०३.०२.२०१७ दिनाङ्के प्रवृत्तायाः राजीवगान्धीपरिसरस्य वाक्यार्थपरिषदः पञ्चमाधिवेशने सप्तर्षिविचारः इत्यस्मिन् विषये वाक्यार्थः प्रस्तुतः। श्री.जे.सि.बि.एम्. महाविद्यालये आरब्धस्य "Introduction to Indian Mathematics" इत्यस्य प्रमाणपत्रपाठ्यक्रमस्य समुद्घाटनकार्यक्रमे संयोजकत्वेन मुख्यातिथिरूपेण च भागमूढ्वा शुभाशंसनं कृतम्। राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूरुपरिसरे प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां सप्तर्षिमण्डलमित्यस्मिन् विषये व्याख्यानं विहितम्। मार्च मासस्य ४ दिनाङ्कात् १० दिनाङ्कपर्यन्तं प्रवृत्तायाः "गणितशास्त्रविकासे भारतीयानां योगदानम्" इत्यस्याः सप्तदिनात्मिकायाः कार्यशालायाः संयोजनं कृतम्। मार्चमासस्य चतुर्थपञ्चमदिनाङ्कयोः मुक्तस्वाध्यायपीठपक्षतः सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां "मुक्तस्वाध्यायपीठे ज्यौतिषपाठ्यक्रमस्य गुणवत्तावर्धनोपायाः" इति विषयमधिकृत्य पत्रप्रस्तुतिः विहिता। मार्च-मासस्य नवमे दिनाङ्के "Ancient Indian Mathematics correlation with the present" इत्यस्मिन् विषये शृङ्गेरिस्थे श्री.जे.सि.बि.एम् महाविद्यालये प्रवृत्तायां सङ्गोष्ठ्यां व्याख्यानं विहितम्। अस्याः सङ्गोष्ठ्याः संयोजनं कृत्वा प्रास्ताविकं व्याख्यानं कृतम्। मार्च मासस्य १५ दिनाङ्कात् २४ दिनाङ्कपर्यन्तं प्रयागस्थे गङ्गनाथझापरिसरे प्रवृत्तायां दशदिनव्यापिन्यां राष्ट्रिय-ज्योतिष-पाठलेखन/सम्पादनकार्यशालायां भागग्रहणं कृतम्। प्रयागस्थे गङ्गनाथझापरिसरे मार्च २२ तः २८ आयोजितायां सप्तदिनात्मिकायां राष्ट्रियविचारगोष्ठ्याम् आमन्त्रितवक्तृरूपेण "प्राचीनभारते गणितशास्त्रम्" इति विषयमवलम्ब्य व्याख्यानं विहितम्।

**डॉ. सुधांशुकुमार नन्दः –** राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूरपरिसरेण आयोजितायां राष्ट्रियसंगोष्ठ्यां भूचयनविधिः इत्यस्मिन् विषये स्वपत्रम् उपस्थापितम्। राष्ट्रियसंस्कृतसंस्थानस्य श्रीसदाशिवपरिसरस्य ज्योतिषविभागपक्षतः विज्ञानसम्मतं ज्योतिषशास्त्रम् इत्यमुं विषयमाधारीकृत्य समायोजितायां राष्ट्रियसंगोष्ठ्यां विज्ञानसम्मतं वास्तुशास्त्रम् इत्यस्मिन् विषये स्वपत्रम् उपस्थापितवान्। राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरस्य ज्योतिषविभागपक्षतः षडङ्गं ज्योतिश्शास्त्रम् इत्यस्मिन् विषये आयोजितायां राष्ट्रियसंगोष्ठ्यां प्रश्नकाले दैवज्ञेन विचारणीयविषयाः इति विषयमाधारीकृत्य स्वपत्रम् उपस्थापितवान्। राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरस्य ज्योतिषविभागेन आयोजितायां गणितशास्त्रविकासे भारतीयानां योगदानम् इत्यस्मिन् विषये साप्ताहिक-कार्यशालायां भागं गृहीतवान्। राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरे अन्ताराष्ट्रियसंगोष्ठी इत्यस्मिन् विषये चित्तवृत्ति-निरोधोपायः इत्यस्मिन् विषये स्वपत्रमुपस्थापितवान्।

**रमानन्दभट्टःएन् –** राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूरपरिसरे २०१७ वर्षस्य फरवरीमासस्य १६ तथा १७ दिनाङ्कयोः "ज्योतिश्शास्त्रमनेकभेदविषयम्" इत्यस्मिन्विषये प्रवृत्तायां ज्योतिश्शास्त्रीयराष्ट्रियसङ्गोष्ठ्यां मुख्यवक्तृत्वेन भागं निरवहत् गोचरफलविमर्शः इत्यस्मिन्विषये च पत्रं प्रस्तुतीकृतवान्। राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरे २०१७ वर्षस्य मार्च मासस्य ११, १२ दिनाङ्कयोः षडङ्गं ज्योतिषम् इत्यस्मिन्विषये प्रवृत्तायां ज्योतिश्शास्त्रीयराष्ट्रियसङ्गोष्ठ्यां जातकपद्धतिग्रन्थाः तत्कर्तारश्च इत्ययं विषयः प्रस्तुतः। राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरे २०१७ वर्षस्य मार्चमासस्य २१, २२ तथा २३ दिनाङ्केषु Contribution of Pali, Prakrit and Sanskrit literature to Yoga and Meditations इत्यस्मिन्विषये प्रवृत्तायाम् अन्ताराष्ट्रियसङ्गोष्ठ्यां हठयोगनिरूपणम् इति विषये पत्रप्रस्तावः कृतः। राष्ट्रियसंस्कृतसंस्थानस्य राजीवगान्धीपरिसरे २०१७ वर्षस्य मार्चमासस्य ४ दिनाङ्कतः १० दिनाङ्कपर्यन्तं Hindus Contributions to the Development of Mathamatical Sciences इत्यस्मिन्विषये प्रवृत्तायां सप्तदिनात्मककार्यशालायां भागः गृहीतः। परिसरस्य निकटवर्तिनि श्री.जे.सि.बि.एम्महाविद्यालये Introduction to Indian Mathematics (भारतीयगणितशास्त्रस्य परिचयः) इति मासचतुष्टयात्मके वर्गे (Certificate course) अध्यापनं विहितम्।

# क.जे. सोमैयासंस्कृतविद्यापीठवार्ता

## शिक्षाशास्त्रविभागीयकार्यक्रमाः

परिसरेऽस्मिन् योगाभ्यासकक्ष्याः जनवरीप्रथमसप्ताहे शिक्षाशास्त्रविभागे समायोजिषत। जनवरीमासान्ते ३० तमदिनाङ्कतः फेब्रवरी ३ दिनाङ्कं यावत् शिक्षाशास्त्रविभागीयाः विभिन्नप्रायोगिकपरीक्षाः समभवन्। सामूहिकच्छायाचित्रस्वीकरणं चासीत्।

## मातृभाषादिवसाचरणम्

राष्ट्रियसंस्कृतसंस्थानस्य क.जे. सोमैयासंस्कृतविद्यापीठे २२.०२.२०१७ दिनाङ्के मातृभाषा-दिवसमुपलक्ष्य कार्यक्रमः समायोजि। तत्र प्रो. अनिल सपकालमहोदयः मुम्बईविद्यापीठस्य मराठीविभागीयः वरिष्ठाचार्यः मुख्यातिथिरूपेणोपस्थाय चित्रपटनिर्माणं, तत्र भाषायाः महत्त्वं चेति विषयं छात्रान्नुद्दिश्य प्राबोधयत्। कार्यक्रमेऽस्मिन् आध्यक्ष्यं तावत् परिसरप्राचार्यः प्रो. सुदेशकुमार-शर्ममहोदयः निरवहत्। सम्पूर्णस्यास्य कार्यक्रमस्य संयोजिका परिसरीयमराठीविभागीयप्राध्यापिका डॉ. मीनाक्षी बरहडे आसीत्। सा कार्यक्रमसञ्चालनं चाकरोत्। एतदङ्गत्वेन काश्चन स्पर्धाः समायोज्य विजेतृणां छात्राणां कृते पुरस्कारोऽपि दिनेऽस्मिन् प्रादायि। परिसरीयाः सर्वेऽपि सदस्याः समुपस्थिता आसन्।



मातृभाषादिवसाचारणे प्रमाणपत्रवितरणस्य एकं दृश्यम्

## व्याकरणविभागीयसङ्गोष्ठी

परिसरस्य व्याकरणविभागीयराष्ट्रियसङ्गोष्ठी "महाभाष्याद्याह्निकद्वयस्य तत्त्वविमर्शः" इति विषये, विशिष्टव्याख्यानमाला च मार्चमासस्य ६ दिनाङ्कतः ७ पर्यन्तं प्रावर्तत। तत्रोद्घाटकत्वेनाहुताः जयपुरपरिसरीयप्राचार्याः प्रो. प्रकाशपाण्डेयवर्याः परिसरप्राचार्याणां प्रो. सुदेशकुमार-शर्ममहोदयानाम् आध्यक्ष्ये, विशिष्टव्याख्यानं महाभाष्यपस्पशाह्निकविषये विधातुमुपस्थितानां वाराणसीय-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य आचार्यचरणां श्रीकान्तपाण्डेयवर्याणां सान्निध्ये समुदघाटयन्। अपराह्णतः द्वितीयदिनं यावत् सत्राणि विभिन्नप्रदेशेभ्यः आगतानां पण्डितानां पत्रप्रस्तुत्या सह सञ्चालितानि। ०७.०३.२०१७ अपराह्णे दिनाङ्के आचार्याणां श्रीकान्तपाण्डेयवर्याणामुपस्थितौ समापनसत्रं सम्पन्नम्। अस्याः सङ्गोष्ठ्याः संयोजकः प्रो. प्रकाशचन्द्रवर्यः आसीत्। सङ्गोष्ठीसत्रसञ्चालनं विभागीयाध्यापकः डॉ. नवीनकुमारमिश्रः, उद्घाटनसमापनयोः सञ्चालनं डॉ. माधवदत्तपाण्डेयः चाकुरुताम्।

## ज्योतिषविभागीयसङ्गोष्ठी

परिसरे ज्योतिषविभागे द्विदिवसीयराष्ट्रियसङ्गोष्ठी "संहिताशास्त्रे जलविज्ञानम्" इति विषये विशिष्टव्याख्यानमाला च मार्चमासस्य ७-८ दिनाङ्कयोः समायोजिता। अस्यां जयपुरपरिसरतः आगताः प्रो. ईश्वरभट्टवर्याः मुख्यातिथयः भूत्वा विशिष्टव्याख्यानं च राजयोगानामपवादाः इति विषये दत्तवन्तः। परिसरप्राचार्याः आध्यक्ष्यं निरवहन्। संयोजकः विभागीयाध्यापकः डॉ. आशिषकुमार-चौधरिवर्यः आसीत्। सङ्गोष्ठ्यां विभिन्नसत्राणि सञ्चालितानि यत्र प्रो. भरतभूषणमिश्रः डॉ. धनञ्जयमिश्रश्च आध्यक्ष्यं निरूढवन्तौ। विभिन्नप्रदेशेभ्यः आगतानां परिसरीयाध्यापकानां छात्राणां च आहत्य २१ शोधपत्राणि प्रस्तुतानि सङ्गोष्ठ्यामस्याम्।



संगोष्ठ्याम् अतिथीनां सम्माननं विदधानः परिसरप्राचार्यः

## साहित्यविभागीयसङ्गोष्ठी

मार्चमासस्य ८-९ दिनाङ्कयोः परिसरेऽस्मिन् साहित्यविभागीयराष्ट्रियसङ्गोष्ठी "रूपकेषु नायकः नायिका च" इति विषये विशिष्टव्याख्यानमाला च प्राचलत्। काञ्चीपुरस्थस्य श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वविद्यालयस्य कुलसचिवः प्रो. गुल्लपल्ली श्रीनिवासवर्यः रसगङ्गाधरदिशा रसविचारः इति विषये विशिष्टव्याख्यानं प्रास्तौत्। भारतस्य विभिन्नविश्वविद्यालयेभ्यः संस्थानस्य विभिन्नपरिसरेभ्यश्च समागताः विद्वांसः शोधपत्राणि प्रास्तुवन्।

## आधुनिकविभागीयसङ्गोष्ठी

परिसरेऽस्मिन् हिन्दी, आङ्ग्लम्, मराठी, सङ्गणकम्, राजनीतिशास्त्रम्, शारीरिकशिक्षणम्, चेति अधुनिकविषयविभागाः षट् सन्ति। एतेषां विभागानां द्विदिवसीयराष्ट्रिसङ्गोष्ठी विशिष्टव्याख्यानं च ०९.०३.२०१७ तः १०.०३.२०१७ पर्यन्तं प्राचलत्। प्रथमदिने परिसर-प्राचार्याणामाध्यक्ष्ये जम्मूतः आगतस्य प्रो. शरच्चन्द्रशर्मवर्यस्य सारस्वतातिथ्ये, मुम्बईविद्यापीठस्य हिन्दीविभागाध्यक्षस्य प्रो. विष्णुसर्वदेमहोदयस्य मुख्यातिथ्ये उद्घाटनकार्यक्रमः आसीत्। अनन्तरं प्रत्येकं विभागस्य सत्राणि तत्तद्विभागीयविषयविशेषज्ञस्य आध्यक्ष्ये प्राचलन्। संयोजिकास्याः

परिसरवार्ता

सङ्गोष्ठ्याः हिन्दीप्राध्यापिका डॉ. गीतादूबेमहोदया आसीत्। प्रत्येकं विभागस्य सत्रसञ्चालनं तत्तद्विभागीयाध्यापकः अकरोत्। आहत्य षट्सत्रेषु २८ शोधपत्राणि प्रस्तुतानि। हिन्दी-हिन्दी का भक्ति काव्य, आङ्ग्लम् - Recent Trends in Contemporary Literature, मराठी - भाषामाध्यम्, आणी तन्त्रज्ञान, सङ्गणक - Computer Programming Languages in Develop a Programs, राजनीतिशास्त्रम् - भारतीय सांविधानिक प्रावधानों का समीक्षात्मक विश्लेषण, शारीरिकशिक्षणम् - शारीरिकशिक्षा में स्वास्थ्य का महत्त्व इति च विषया आसन्। १०.०३.२०१७ दिनाङ्के अपराह्णे प्रो. प्रकाशचन्द्रमहोदयस्याध्यक्ष्ये, प्रो. मदनमोहनझावर्यस्य विशिष्टातिथ्ये, प्रो. शरच्चन्द्रशर्ममहोदयस्य मुख्यातिथित्वे समापनकार्यक्रमः सम्पन्नः।



सङ्गोष्ठ्यां प्रमाणपत्रं वितरन्तः अतिथयः

## शिक्षाशास्त्रविभागीयराष्ट्रियसङ्गोष्ठी विशिष्टव्याख्यानञ्च

राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य क.जे. सोमैयासंस्कृतविद्यापीठमित्याख्ये मुम्बईपरिसरे शिक्षाशास्त्रविभागीयराष्ट्रिय-सङ्गोष्ठ्याः विशिष्टव्याख्यानस्य चायोजनमकारि। १०.०३.२०१७ एवम् ११.०३.२०१७ दिनाङ्कयोः दिनद्वयात्मिका शिक्षाशास्त्रविभागीय-राष्ट्रियसङ्गोष्ठी विशिष्टव्याख्यानं च मूल्याधारितशिक्षा मानवाधिकारशिक्षा च इति विषये समायोजि। तत्र विभिन्नेभ्यः राज्येभ्यः समागताः अनेके विद्वांसः, परिसरस्यास्याध्यापकाः, शोधच्छात्राः, छात्राश्च प्रधानविषयाधरितं स्वाभीष्टविचारमवलम्ब्य पत्रवाचनं स्वाभिमतेन साकं सविमर्शं प्रास्तुवन्। १०.०३.२०१७ तमे दिनाङ्के पूर्वाह्णे १०:३० वादने उद्घाटनसमारोहः, राजस्थानस्य जयपुरस्थस्य श्रीमज्जगद्गुरुरामानन्दराजस्थान-संस्कृतविश्वविद्यालयस्य पूर्वसङ्कायप्रमुखाणाम् आचार्याणां गोपीनाथशर्मणां सारस्वतातिथित्वे, राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य जयपुरपरिसरस्य शिक्षाविभागस्य वरिष्ठाचार्याणां सोहनलालपाण्डेयवर्याणां मुख्यातिथित्वे, परिसरस्यास्य प्राचार्याणामाचार्याणां सुदेशकुमार-शर्मणामाध्यक्ष्ये, परिसरशिक्षाविभागस्याध्यक्षाणामाचार्याणां मदनमोहनझामहोदयानां समन्वयकत्वे, प्राध्यापकस्य डॉ. विनोदकुमारशर्मणः कार्यक्रमसञ्चालनेन च समभूत्। तदनु पञ्चप्रधानसत्रेषु विभक्ता सङ्गोष्ठी विभिन्नानां विदुषां सत्राध्यक्ष्ये दिनद्वयं प्राचलत्। द्वितीये दिने सत्रद्वयं शिक्षाशास्त्रिच्छात्राणां कृते भिन्नतया विशेषरूपेणासीत्। सङ्गोष्ठ्यामस्यां भोपालतः, तिरुपतितः, गरलीतः, नवदेहलीतः, जयपुरतः एवं विभेन्नेभ्यः प्रदेशेभ्यः समागताः विषयविशेषज्ञाः विद्वांसः परिसरीयाश्चाहत्य ६३ प्रतिभागिनः स्वविचारान् प्रास्तुवन्। सन्दर्भेऽस्मिन्मूल्य-शिक्षासम्बद्धाः मानवाधिकारसम्बद्धाश्च विनूतनविचाराः अनेके समचर्चिषत। ११.०३.२०१७ दिनाङ्के अपराह्णे २:३० वादने समापनकार्यक्रमोऽभवत्। तत्र परिसरस्यास्य व्याकरणविभागाध्यक्षाः वरिष्ठाचार्याः प्रो. प्रकाशचन्द्रवर्याः अध्यक्षाः आसन्। विशिष्टातिथिरूपेण श्रीमज्जगद्गुरुरामानन्दराजस्थानसंस्कृतविश्वविद्यालयस्य पूर्वसङ्कायप्रमुखाः आचार्याः गोपीनाथशर्ममहोदयाः एवं जयपुरपरिसरस्य शिक्षाविभागस्य वरिष्ठाचार्याः प्रो. सोहनलालपाण्डेयवर्याः मुख्यातिथिरूपेण, परिसरशिक्षाशास्त्रविभागाध्यक्षाः प्रो. मदनमोहन-झामहोदयाः समन्वयकत्वेन चोपस्थाय सर्वान् स्ववचोभिरन्वगृह्णन्। कार्यक्रमस्यास्य सञ्चालनं विभागीयाध्यापकः डॉ. कुमारः अकरोत्। सम्पूर्णायाः सङ्गोष्ठ्याः संयोजकावास्ताम् विभागीयवरिष्ठसहायकाचार्यौ डॉ. देवदत्तसरोदेवर्यः डॉ. वी. एस्. वी. भास्कररेड्डीमहोदयश्च। इतरे विभागीयाध्यापकाः सहसंयोजने सहायका अभूवन्।



सङ्गोष्ठ्यां मञ्चासीनाः अतिथयः

## वार्षिकोत्सवः

प्रतिवर्षमिवास्मिन् वर्षेऽपि परिसरीयवार्षिकोत्सवकार्यक्रमः मार्चमासस्य १८ तमे दिनाङ्के समायोजितः। तत्र सोमैय्यासमूहसंस्थायाः वरिष्ठमार्गदर्शकः प्रो. राजन् वेलुकरमहाशयः विशिष्टातिथिरूपेण समुपस्थाय प्रेरणात्मकमुद्बोधनं छात्रानुद्दिश्याकरोत्। मुख्यातिथिरूपेण महाराष्ट्रराज्यस्य भाषाविभागस्य निर्देशिका श्रीमती डॉ. मञ्जूषाकुलकर्णी महाभागा संस्कृतभाषया सुष्ठु सम्भाष्य छात्रान् संस्कृताध्ययनाध्यापनाय प्रचाराय च सम्प्रैरयत्। परिसरप्राचार्यः आचार्यः सुदेशकुमारशर्मवर्यः आध्यक्ष्यमूढ्वा संस्कृतस्य माहात्म्यमवर्णयत्। व्याकरणविभागास्याध्यक्षः वरिष्ठाचार्यः प्रकाशचन्द्रवर्यः संयोजकः भूत्वा सर्वेषां स्वागतमकरोत्। आवर्षं सञ्चालितानां कार्यक्रमाणां परिसरीयविषयाणां विवरणपूर्ण-वार्षिकप्रतिवेदनं परिसरीयशिक्षाशस्त्रविभागाध्यक्षः प्रो. मदनमोहनझावर्यः प्रास्तौत्। परिसरीयसांस्कृतिकस्पर्धासु क्रीडासु राष्ट्रस्तरीयस्पर्धासु च विजेतृणां छात्राणां कृते पुरस्कारवितरणं कृतम्। तदनु केचन सांस्कृतिककार्यक्रमाः आसन्। अन्ते धन्यवादसमर्पणं साहित्यप्राध्यापकः डॉ. ई.आर्. नारायणन् अकरोत्। सञ्चालनं साहित्यप्राध्यापकः डॉ. सुदर्शनचिपलूणकरः अकरोत्।

## श्रीरघुनाथकीर्तिपरिसरवार्ता

**व्याकरणविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी –** व्याकरणविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २३.०१.२०१७ तः २४.०१.२०१७ दिनाङ्कं यावत् जाता। अस्याः सङ्गोष्ठ्याः केन्द्रीयो विषयः आसीत्–"महाभाष्यस्य लौकिकालौकिकोपयोगित्वम्।" अस्यां सङ्गोष्ठ्याम् आहत्य पञ्च सत्राणि समायोजितानि। अस्यां सङ्गोष्ठ्याम् २३.०१.२०१७ दिनाङ्के उद्घाटनसत्रे मुख्यातिथित्वेन कोलकाताराष्ट्रियसंस्कृत-महाविद्यालयस्य (मानितविश्वविद्यालयस्य) प्राच्यविद्याविभागाध्यक्षः डॉ. तन्मयकुमारभट्टाचार्यः समुपस्थितः। सत्रस्यास्य आध्यक्ष्यं परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः निरवहत्। अस्यां सङ्गोष्ठ्याम् २४.०१.२०१७ दिनाङ्के सम्पूर्तिसत्रे मुख्यातिथित्वेन हरिद्वारस्थ-भगवान्दाशआदर्शसंस्कृतमहाविद्यालस्य विद्वान् निरञ्जनमिश्रः समुपस्थितः। अस्य सत्रस्य आध्यक्ष्यं परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः निरवहत्। अस्यां सङ्गोष्ठ्यां राष्ट्रस्य विविधभागेभ्यः आहत्य १५ विद्वांसः शोधपत्राणि प्रास्तुवन्। अस्याः सङ्गोष्ठ्याः संयोजकदायित्वं प्रो. बनमाली बिश्वालमहोदय आवहत्।

**साहित्यविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी –** साहित्यविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २४.०१.२०१७ तः २५.०१.२०१७ दिनाङ्कं यावत् आयोजिता। सङ्गोष्ठ्याः अस्याः मुख्यो विषयः आसीत्–"संस्कृतेऽनूदितं लघुकथासाहित्यम्"। अस्यां सङ्गोष्ठ्याम् पञ्च सत्राणि समायोजितानि। अस्यां सङ्गोष्ठ्याम् २४.०१.२०१७ दिनाङ्के उद्घाटनसत्रे मुख्यातिथित्वेन वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः प्रो. अभिराजराजेन्द्रमिश्रः समुपस्थितः। २५.०१.२०१७ दिनाङ्के सम्पूर्तिसत्रे मुख्यातिथित्वेन उत्तराखण्डसंस्कृतशिक्षा-निदेशालयस्य निदेशकचरः डॉ. वाचस्पतिमैठाणी आसीत्। द्वयोरपि सत्रयोः आध्यक्ष्यं परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः निरवहत्। अस्यां सङ्गोष्ठ्यां राष्ट्रस्य विविधभागेभ्यः आहत्य २५ विद्वांसः शोधपत्राणि प्रास्तुवन्। अस्याः सङ्गोष्ठ्याः संयोजकदायित्वं डॉ. प्रफुल्लगडपालमहोदयः आवहत्।



साहित्यसङ्गोष्ठ्याः एकं दृश्यम्

**ज्योतिषविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी –** ज्योतिषविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी २७.०१.२०१७ तः २८.०१.२०१७ दिनाङ्कं यावत् समायोजिता। तत्र च प्रमुखविषयः आसीत्–"गोलविमर्शः।" अस्यां सङ्गोष्ठ्यां पञ्च सत्राणि समायोजितानि। २७.०१.२०१७ दिनाङ्के उद्घाटनसत्रे मुख्यातिथित्वेन भोपालपरिसरस्य ज्योतिषविभागस्य आचार्यः प्रो. हंसधरझा समुपस्थितः। २८.०१.२०१७ दिनाङ्के सम्पूर्तिसत्रे विशिष्टातिथिः पूर्वकैबिनेटमन्त्री उत्तराखण्ड क्योङ्कालेश्वरझालीमालीदेवीआश्रमस्य समाजसेवकः मोहनसिंहरावतगाँववासी आसीत्। द्वयोरपि सत्रयोः आध्यक्ष्यं परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः निरवहत्। अस्यां सङ्गोष्ठ्यां राष्ट्रस्य विविधभागेभ्यः आहत्य २५ विद्वांसः शोधपत्राणि प्रास्तुवन्। अस्याः सङ्गोष्ठ्याः संयोजकदायित्वं डॉ. मुकेशकुमारमहोदयः आवहत्।




अतिथीन् सम्मानयन्तः प्राचार्याः

**वेदविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी –** वेदविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २८.०१.२०१७ तः २९.०१.२०१७ दिनाङ्कं यावत् सम्पन्ना। अस्याः सङ्गोष्ठ्याः मुख्यो विषयः आसीत्–"वेदेषु राष्ट्रचेतना।" अस्यां सङ्गोष्ठ्यां पञ्च सत्राणि समायोजितानि। २८.०१.२०१७ दिनाङ्के उद्घाटनसत्रे मुख्यातिथित्वेन राष्ट्रियसंस्कृतसंस्थानमुख्यालयपरिसर-नवदेहलीतः वेदविभागस्य आचार्योऽध्यक्षः च प्रो. मनोजकुमारमिश्रः समुपस्थितः तथा च विशिष्टातिथित्वेन काशीहिन्दूविश्वविद्यालयस्य संस्कृतविद्याधर्मविज्ञानसङ्कायस्य सहायकाचार्यः सुनीलकात्यायनः आसीत्। २९.०१.२०१७ दिनाङ्के सम्पूर्तिसत्रे मुख्यातिथिः रूद्रप्रयागस्थश्री १०८ स्वामिसच्चिदानन्दवेदभवनसंस्कृतमहाविद्यालयस्य डॉ. रामप्रसादउपाध्यायः आसीत् तथा च विशिष्टातिथिः ज्योतिर्मठश्रीबद्रीनाथवेदवेदाङ्गसंस्कृतमहाविद्यालयस्य वेदविभागस्य सहायक-प्रवक्ता श्रीवाणीविलासडिमरी आसीत्। द्वयोरपि सत्रयोः आध्यक्ष्यं परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः निरवहत्। अस्यां सङ्गोष्ठ्यां राष्ट्रस्य विविधभागेभ्यः आहत्य ३० विद्वांसः शोधपत्राणि प्रास्तुवन्। अस्याः सङ्गोष्ठ्याः संयोजकदायित्वं डॉ. शैलेन्द्रप्रसादउनियालमहोदयः आवहत्।



सम्मानयन्तः प्राचार्याः

**आधुनिकविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी –** आधुनिकविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २९.०१.२०१७ तः ३०.०१.२०१७ दिनाङ्कं यावत् जाता। अस्याः सङ्गोष्ठ्याः प्रधानविषयः आसीत्–"आधुनिक विषयों का संस्कृत के साथ अन्त:सम्बन्ध।" अस्यां सङ्गोष्ठ्यां पञ्च सत्राणि समायोजितानि। २९.०१.२०१७ दिनाङ्के उद्घाटनसत्रे मुख्यातिथित्वेन

हे.न.ब.गु. विश्वविद्यालयस्य टिहरीपरिसरस्य हिन्दीविभागाध्यक्षा समुपस्थिता तथा च विशिष्टातिथित्वेन उत्तराखण्डसंस्कृतविश्वविद्यालयस्य इतिहासविभागाध्यक्षः डॉ. अजयपरमारः आसीत्। ३०.०१.२०१७ दिनाङ्के सम्पूर्तिसत्रे मुख्यातिथिः श्रीनगरस्थ हे.न.ब.ग. विश्वविद्यालयस्य अंग्रेजीविभागाध्यक्षः प्रो. डी.आर. पुरोहितः आसीत्। विशिष्टातिथिः हरिद्वारस्थदेवसंस्कृतविश्वविद्यालयस्य पत्रकारिताविभागाध्यक्षः प्रो. सुखनन्दसिंहः आसीत्। द्वयोरपि सत्रयोः आध्यक्ष्यं परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः निरवहत्। अस्यां सङ्गोष्ठ्यां राष्ट्रस्य विविधभागेभ्यः आहत्य ६० विद्वांसः शोधपत्राणि प्रास्तुवन्। अस्याः सङ्गोष्ठ्याः संयोजकदायित्वं डॉ. अरविन्दसिंहगौरः आवहत्।

**न्यायविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी** – न्यायविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी २७.०१.२०१७ तः २८.०१.२०१७ दिनाङ्कं यावत् सम्पन्ना। तत्र च मुख्यो विषयः आसीत्–"न्यायशास्त्रस्य शास्त्रन्तरेषु प्रभावः।" अस्यां सङ्गोष्ठ्यां चत्वारि सत्राणि समायोजितानि। अस्यां सङ्गोष्ठ्याम् ३०.०१.२०१७ दिनाङ्के उद्घाटनसत्रे मुख्यातिथित्वेन उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. पीयूषकान्तदीक्षितः समुपस्थितः। ३१.०१.२०१७ दिनाङ्के सम्पूर्तिसत्रे मुख्यातिथिः रा.सं.सं. वेदव्यासपरिसरस्य साहित्याचार्यः इदानीं पतञ्जलियोगविद्यापीठे आर्युवेदपाण्डुलिपिग्रन्थसंग्रहालये कार्यरतः प्रो. विजयपालशास्त्री आसीत्। द्वयोरपि सत्रयोः आध्यक्ष्यं परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुः निरवहत्। अस्यां सङ्गोष्ठ्यां राष्ट्रस्य विविधभागेभ्यः आहत्य १५ विद्वांसः शोधपत्राणि प्रास्तुवन्। अस्याः सङ्गोष्ठ्याः संयोजकदायित्वं डॉ. आर. बालमुरुगन् आवहत्।



न्यायविभागराष्ट्रियसङ्गोष्ठ्याः एकं दृश्यम्

## आयोजिता: विशिष्टव्याख्यानमाला:

राष्ट्रियसंस्कृतसंस्थानस्याङ्गभूते देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे विविधविभागीया विशिष्टव्याख्यानमाला २३.०१.२०१७ तः ३१.०१.२०१७ दिनाङ्कं यावत् सम्पन्ना। एतत्क्रमे इमाः विशिष्टव्याख्यानमालाः समायोजिताः–

**व्याकरणविभागीया विशिष्टव्याख्यानमाला** – व्याकरणविभागीया विशिष्टव्याख्यानमाला २३.०१.२०१७ तमे दिनाङ्के सम्पन्ना। अत्र व्याख्यान-विषयः–"कैयटादिभाष्यव्याख्यातृणाम् उदात्तादिविषयिणी महती भ्रान्तिः।" मुख्यवक्ता–प्रो. विजयपालशास्त्रिमहोदयः रा.सं.सं. वेदव्यासपरिसरस्य साहित्याचार्यः इदानीं पतञ्जलियोगविद्यापीठे आर्युवेदपाण्डुलिपिग्रन्थसंग्रहालये कार्यरतः।

**साहित्यविभागीया विशिष्टव्याख्यानमाला** – साहित्यविभागीया विशिष्टव्याख्यानमाला २४.०१.२०१७ तमे दिनाङ्के सम्पन्ना। अत्र व्याख्यानविषयः–"समकालिकसंस्कृतसाहित्यस्य नवीनाः प्रवृत्तयः"। मुख्यवक्ता–प्रो. अभिराजराजेन्द्रमिश्रमहोदयः पूर्वकुलपतिः, वाराणसीस्थ–सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

**ज्योतिषविभागीया विशिष्टव्याख्यानमाला** – ज्योतिषविभागीया विशिष्टव्याख्यानमाला २७.०१.२०१७ तमे दिनाङ्के सम्पन्ना। अत्र व्याख्यानविषयः–"व्रतपर्वसु मुहूर्तविमर्शः।" मुख्यवक्ता–प्रो. हंसधरझाः, आचार्यः, ज्योतिषविभागः, रा.सं.सं., भोपालपरिसरः।

**वेदविभागीया विशिष्टव्याख्यानमाला** – वेदविभागीया विशिष्टव्याख्यानमाला २८.०१.२०१७ तमे दिनाङ्के ३.०० वादने सम्पन्ना। अत्र व्याख्यानविषयः–"वैदिकविज्ञानप्रकृतिः।" मुख्यवक्ता–प्रो. मनोजकुमारमिश्रः, नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानस्य वेदविभागाध्यक्षः।

**आधुनिकविभागीया विशिष्टव्याख्यानमाला** – आधुनिकविभागीया विशिष्टव्याख्यानमाला २९.०१.२०१७ तमे दिनाङ्के सम्पन्ना। अत्र व्याख्यानविषयः–"ऐतिहासिक स्रोत के रूप में संस्कृत साहित्य।" मुख्यवक्ता–डॉ. अजयपरमारः, विभागाध्यक्षः इतिहास–संस्कृत–पुरातत्त्वविभागः, उत्तराखण्डसंस्कृतविश्वविद्यालयः, हरिद्वारम्।

**न्यायविभागीया विशिष्टव्याख्यानमाला** – न्यायविभागीया विशिष्टव्याख्यानमाला ३०.०१.२०१७ तमे दिनाङ्के सम्पन्ना। व्याख्यान-विषयः–"न्यायशास्त्रे प्रमाणविचारः।" मुख्यवक्ता–प्रो. पीयूषकान्तदीक्षितः, कुलपतिः, उत्तराखण्डसंस्कृतविश्वविद्यालयः, हरिद्वारम्।

## रघुनाथवार्त्तावल्याः लोकार्पणम्

श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकवार्त्तापत्रिका 'रघुनाथवार्तावली' इत्याख्या परिसरस्य वार्षिकोत्सवावसरे २१ मार्च, २०१७ तमे दिनाङ्के परिसरप्राचार्येण समुपस्थितैः अतिथिभिश्च लोकाय अर्पिता। पत्रिकेयं परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य संरक्षकत्वे, प्रो. बनमालीविश्वाल–डॉ. प्रफुल्लगडपालयोः मार्गदर्शने प्रकाश्यते। पत्रिकायाः अस्याः सम्पादकाः वर्तन्ते–डॉ. शैलेन्द्रनारायणकोटियालः, डॉ. मनीषजुगरानः, श्रीश्रीओमशर्मा च। अस्यां नूतनायां पत्रिकायां परिसरस्य सर्वेऽपि प्रमुखाः क्रियाकलापाः प्राकाश्यं गताः।


रघुनाथवार्तावलीं विमोचयन्तः अतिथयः

### मातृभाषादिवसः समायोजितः

फरवरीमासस्य २१ दिनाङ्के परिसरे मातृभाषादिवसः आयोजितः। एतदवसरे परिसरे गीतभाषणस्पर्धे आयोजिते। अवसरेऽस्मिन् उत्तराखण्डस्य प्रसिद्धो लोकगायकः श्रीमान् प्रीतमसिंहभरतवाणः समेषां मार्गदर्शनमकरोत्। कार्यक्रमस्यास्य संयोजनं हिन्दीप्राध्यापकः डॉ. वीरेन्द्रबर्त्वालः अकरोत्।

### कौमुदीमहोत्सवे परिसरस्य भागग्रहणम्

नवदेहलीस्थेन राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षं कौमुदीमहोत्सवः इत्याख्या अन्तःपरिसरीया नाट्यस्पर्धा नवदेहल्यां समायोज्यते। ऐषमः २७ फरवरी, २०१७ तः ०१ मार्च, २०१७ पर्यन्तं चतुर्दशः नाट्यमहोत्सवः समायोजितः। नवदेहल्यां समायोजिते कौमुदीमहोत्सवे परिसरस्य नाट्यदलेन वि. नागराजप्रणीतं 'दाम्पत्यकलहम्' इत्याख्यं नाटकं प्रस्तूय सान्त्वनापुरस्कारः लब्धः।



वार्षिकोत्सवकार्यक्रमे समासीनाः अतिथयः

### वार्षिकोत्सवः सम्पन्नः

२१.०३.२०१७ दिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य वार्षिकोत्सवः सम्पन्नः। अस्मिन् कार्यक्रमे मुख्यातिथित्वेन केन्द्रीयलोकनिर्माणविभागस्य मुख्याभियन्ता श्री एस.पी. भारद्वाजः, विशिष्टातिथित्वेन केन्द्रीयलोकनिर्माणविभागस्य अधीक्षण-अभियन्ता श्री आर.पी. यादवः, सारस्वतातिथित्वेन सरस्वतीविद्यामन्दिरस्य प्रधानाचार्यः श्रीविक्रमसिंहचौहानः च समुपस्थिताः। अस्मिन् कार्यक्रमे आध्यक्ष्यं विहितं परिसरप्राचार्येण प्रो. के.बी. सुब्बरायुडुवर्येण। वार्षिकोत्सवस्य अङ्गतया परिसरे आयोजितासु विविध-शैक्षिक-सांस्कृतिक-शारीरिकस्पर्धासु प्राप्तस्थानाः छात्राः पुरस्कृताः अभवन्।

### अखिलभारतीयकविसम्मेलनं सम्पन्नम्

२४.०१.२०१७ दिनाङ्के परिसरे अखिलभारतीयं कविसम्मेलनम् आयोजितम्। कविसम्मेलनेऽस्मिन् संस्कृतक्षेत्रे प्रसिद्धाः कवयः प्रो. अभिराजराजेन्द्रमिश्रः, डॉ. श्रेयांसद्विवेदी, डॉ. ब्रजेन्द्रकुमारसिंहदेवः, डॉ. निरञ्जनमिश्रः, प्रो. बनमालीबिश्वालः, डॉ. नारायणदासः, डॉ. तन्मयभट्टाचार्यः, डॉ. प्रफुल्लगडपालः, डॉ. मनीषजुगरानः, डॉ. शैलेन्द्रनारायणकोटियालः, डॉ. मुकेशशर्मा, डॉ. बीरेन्द्रबर्त्वालः इत्यादयो विद्वांसः काव्यपाठमकुर्वन्।

### गणतन्त्रदिवसः समनुष्ठितः

२६.०१.२०१७ दिनाङ्के परिसरे गणतन्त्रदिवसो महता हर्षोल्लासेन अनुष्ठितः। एतदङ्गतया परिसरच्छात्रैः गीत-नाटक-नृत्यानि प्रस्तुतानि। अस्य कार्यक्रमस्य संयोजनं विहितं श्रीश्रीओमशर्मणा।

## जयपुरपरिसरवार्ता

### युवदिवस्यायोजनम्

परिसरे जनवरीमासस्य द्वादशे दिनाङ्के स्वामीविवेकानन्दजयन्त्याः उपलक्ष्ये युवदिवस्यायोजनं जातम्। दिवसोऽयं दुर्व्यसनोन्मूलनसङ्कल्पदिवसरूपेण आयोजितः। कार्यक्रमस्य अस्य अध्यक्षतां परिसरस्य प्राचार्यः डॉ. प्रकाशपाण्डेयः कृतवान्। कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण अन्ताराष्ट्रियकबड्डीक्रीडकः नवनीतगौतमः उपस्थितः असीत्। कार्यक्रमस्य संयोजकेन प्रो. गजेन्द्रप्रकाशशर्मणा अतिथीनां स्वागतं व्याहृतम्। कार्यक्रमे प्रो. वाई.एस्.रमेशः, प्रो. वासुदेव शर्मा, प्रो. बैद्यनाथ झाः छात्रान् संबोधयन्तः संस्कृतमाध्यमेन राष्ट्रनिर्माणाय यूनः आहूतवन्तः।


युवदिवसकार्यक्रमस्य एकं दृश्यम्

कार्यक्रमस्य सहसंयोजकः डॉ. दिनेश यादवः अतिथीनां धन्यवादान् ज्ञापितवान्। अनेन सहैव स सभागारे सर्वेभ्यः समुपस्थितेभ्यः दुर्व्यसनोन्मूलनाय प्रतिज्ञापितवान्। कार्यक्रमेऽस्मिन् शिक्षकाः कर्मचारिणः छात्राश्च स्वामिविवेकानन्दस्य चतुःपञ्चाशदुत्तरैकशततम्यां जयन्त्यां चतुःपञ्चाशदुत्तरैकशतदीपानां प्रज्वलनं कृतवन्तः।

## भारतीयभटेभ्यः रक्तदानशिविरम्



रक्तदानशिविरस्य एकं दृश्यम्

जनवरीमासस्य त्रयोविंशतितमे दिनाङ्के 'अज़ादहिन्दफ़ौज' दलस्य संस्थापकस्य सुभाषचन्द्रबोसस्य जन्मदिवसमुपलक्ष्य परिसरे रक्तदानशिविरमायोजितम्। शिविरस्य संयोजनं परिसरस्य राष्ट्रियसेवायोजना दलस्य सहयोगेन प्रो. गजेन्द्रप्रकाशशर्मणा, डॉ. दिनेशयादवेन च विहितम्। रक्तदानशिविरे त्रिशताधिकं यूनिट इति परिमाणात्मकं रक्तम् एकत्रितं जातम्। यस्मिन् परिसरीयाः शिक्षकाः, कर्मचारिणः, छात्राः, अन्ये च समाजिकजनाः सोत्साहं रक्तदानम् अकुर्वन्। शिविरे एकत्रितं रक्तं भारतीयभटेभ्यः तेषां परिजनेभ्यश्च समर्पितम्। रक्तदानशिविरे रक्तदातृभ्यः निदानसेवासंस्थानपक्षतः स्मृतिचिह्नानि प्रदत्तानि। कार्यक्रमस्य उद्घाटनसत्रं डॉ. दिनेशयादवेन संञ्चालितम्, प्रो. रामकुमारशर्मणा, प्रो. फ़तहसिंहेन, डॉ. शीशरामेण च रक्तदानस्य महत्त्वं प्रतिपादितम्।

## शिक्षाशास्त्रविभागीया द्विदिवसीयविकीपीडियाकार्यशाला

जनवरीमासस्य २४-२५ दिनाङ्कयोः परिसरस्य शिक्षाशास्त्रविभागेन प्रशिक्षणार्थिनां कृते द्विदिवसीया विकीपीडिया-कार्यशाला आयोजिता। कार्यशालायां प्रशिक्षयितुं विशेषरूपेण प्रो. मधु परहारः, डॉ. मैथिलि च समागता। कार्यशालायां समागतानाम् अतिथीनां स्वागतं विभागाध्यक्षेण प्रो. वाई.एस्. रमेशमहोदयेन कृतम्। इयं कार्यशाला प्रो. संतोष मित्तलस्य संयोजने संचालिता। अस्यां कार्यशालायां शिक्षाशास्त्रिप्रथमवर्षस्य छात्राः विभिन्नेषु समूहेषु विभक्ताः, अपि च तेभ्यः समूहेभ्यः PPT, PDF, picture format एवञ्च MS Word प्रभृतीनां प्रविधीनां सैद्धान्तिकज्ञानं प्रदत्तम्। छात्रेभ्यः प्रायोगिकः अभ्यासश्च कारितः। कार्यशालेयं विभागाध्यक्षस्य प्रो. वाइ.एस्. रमेशमहोदयस्य मार्गदर्शने प्रो. संतोषमित्तलमहोदयायाश्च संयोजने संपन्ना। कार्यशालायाः साफल्ये अन्येषामपि विभागीयसदस्यानां विशेष्येण डॉ. बत्तीलालमीना, डॉ. दिनेशयादव, डॉ. रेखाशर्ममहोदयानां च योगदानम् आसीत्।

## गणतन्त्रदिवससमारोहः

जनवरी-मासस्य २६ दिनाङ्के परिसरे गणतन्त्रदिवसस्य समारोहः सोल्लासम् आयोजितः। अवसरेऽस्मिन् परिसरस्य प्राचार्याः डॉ. प्रकाशपाण्डेयवर्याः ध्वजारोहणेन सह छात्रान् उदबोधयन्। कार्यक्रमस्य संयोजकः प्रो. गजेन्द्रप्रकाशः अवर्तत। कार्यक्रमे उपस्थितेभ्यः सदस्येभ्यः मोदकाः वितरिताः। परिसरीयैः छात्रैः गणतन्त्रदिवसस्यावसरे मण्डनमिश्रच्छात्रावासस्य पुरतः क्रीडाप्राङ्गणे कबड्डी स्पर्धिता।

## शाब्दबोधविषयकं विशिष्टं व्याख्यानम्



विशिष्टव्याख्यानं विदधानाः प्रो. आजादमिश्राः

परिसरस्य शिक्षाशास्त्रविभागेन २७ जनवरीदिनाङ्के विशिष्टं व्याख्यानम् आयोजितम्। विशिष्टव्याख्याने मुख्यवक्ता भोपाल-लखनऊ परिसरयोः भूतपूर्वः प्राचार्यः प्रो. आज़ादमिश्रः आसीत्। तेन छात्राणां शिक्षकाणञ्च पुरतः शाब्दबोधप्रक्रिया प्रतिपादिता। कार्यक्रमस्य अध्यक्षाः परिसरस्य प्राचार्याः डॉ. प्रकाशपाण्डेयमहोदयाः आसन्। कार्यक्रमस्य संयोजकेन शिक्षाशास्त्र-विभागाध्यक्षेन प्रो. वाई.एस्. रमेशेन अतिथीनां स्वागतं व्याहृतम्। कार्यक्रमे परिसरस्य सर्वदर्शन-विभागस्य अध्यक्षाः प्रो. वैद्यनाथझामहोदयाः विशिष्टवक्तृरूपेण सभां संबोधितवन्तः।

## साहित्यशास्त्रीया राष्ट्रिया संगोष्ठी



धर्मशास्त्रसङ्गोष्ठ्यां मञ्चासीनाः अतिथयः

जनवरी मासस्य २८, २९ दिनाङ्कयोः परिसरस्य हिन्दकेसरीसभागारे साहित्यविभागेन द्विदिवसीया राष्ट्रिया संगोष्ठी आयोजिता। 'महिमभट्टसम्मतमनौचित्यम्' विषयिकायाः राष्ट्रिय-संगोष्ठ्याः संयोजकाः साहित्यविभागाध्यक्षाः प्रो. रामकुमारशर्ममहोदयाः आसन्। कार्यक्रमस्य अध्यक्षाः प्राचार्याः डॉ. प्रकाशपाण्डेयमहोदयाः आसन्। संगोष्ठ्यां विशिष्टवक्तारः प्रो. सुरेन्द्रशर्मा, प्रो. रमाकान्तपाण्डेयः, डॉ. हरीशचन्द्रतिवारी, डॉ. उमेशनेपालः, डॉ. सनन्दनत्रिपाठी इत्यादयः विद्वांसः समुपस्थिताः आसन्। संगोष्ठ्याम् अशेषदेशात् समागताः द्विपञ्चाशत् विद्वांसः स्वशोधपत्राणि प्रस्तुतवन्तः। सत्राणाञ्च संचालकाः डॉ, किशोरकुमारदलाई, डॉ. राकेशजैनः, डॉ. निशा, श्री फ़िरोज़श्च आसन्।

## धर्मशास्त्रविभागीयराष्ट्रियसङ्गोष्ठी विशिष्टव्याख्यानञ्च

फरवरीमासस्य ४-५ दिनाङ्कयोः परिसरीयधर्मशास्त्रविभागेन प्रो. भगवतीसुदेशमहोदयायाः

प रि स र वा र्ता

संयोजकत्वे द्विदिवसीयसंगोष्ठ्या: आयोजनं "धर्मशास्त्रीयपरम्परायां मूल्यानां चिन्तनम्" इति विषये कृतम्। कार्यक्रमस्य अध्यक्षा: डॉ. प्रकाशपाण्डेयमहोदया: आसन्। संगोष्ठ्यां विशिष्टवक्तार: अतिथयश्च राजकीयसंस्कृतमहाविद्यालयस्य, कर्नाटकप्रान्तस्य धर्मशास्त्र-विभागाध्यक्षा: प्रो. वेंकटरमणहेगड़े, राजस्थानसंस्कृतविश्वविद्यालयस्य प्रो. राजेन्द्र मिश्र:, मुंबई परिसरस्य प्राचार्य: प्रो. सुदेशशर्मा, डॉ. कमलनयन शर्मा अन्ये च विद्वांस: आसन्। विभिन्नानां शैक्षणिकसत्राणां संचालका: डॉ. कृष्णा शर्मा, डॉ. सिद्धार्थशंकरदास:, डॉ. दिनेश यादव:, डॉ. पवन व्यास:, डॉ. रामेश्वरदयाल शर्मा च आसन्। संगोष्ठ्यां ६० पत्राणां वाचनं विद्वद्भि: कृतम्।

### शिक्षाशास्त्रिद्वितीयवर्षस्य वार्षिकप्रायोगिकपरीक्षा

शिक्षाशास्त्रविभागे प्रशिक्षणरतानां शिक्षाशास्त्रिद्वितीयवर्षस्य प्रशिक्षणार्थिनां वार्षिकप्रायोगिकपरीक्षा ६ त: १० फरवरीपर्यन्तं जयपुरमण्डलस्य मोहनपुर-रामसिंहपुर-गोविंदपुर-प्रतापनगरस्य संस्कृतविद्यालयेषु संपन्ना। परीक्षकरूपेण जगद्गुरुरामानन्दाचार्यसंस्कृतविश्व-विद्यालयस्य शिक्षासंकायाध्यक्ष: डॉ. साम्बशिवमूर्ति: एवं च जयपुरपरिसरस्य शिक्षाशास्त्रविभागस्य अध्यक्ष: प्रो. वाई.एस्. रमेशमहोदय: च विभागस्य ९६ छात्राणां प्रायोगिकीपरीक्षणं कृतवन्तौ। प्रायोगिकपरीक्षाया: संयोजकरूपेण डॉ. शीशराममहोदय: कार्यं सम्पादितवान्।

### ज्योतिषविभागीया राष्ट्रियसंगोष्ठी

फ़रवरीमासस्य १८-१९ दिनाङ्कयो: ज्योतिषविभागस्य राष्ट्रियसंगोष्ठी विशिष्टं व्याख्यानञ्चायोजितम्। संगोष्ठ्या: विषय: 'भूगर्भ जलान्वेषणप्रविधय:' आसीत्। संगोष्ठ्या: विशिष्टा: वक्तार: प्रो. देवीप्रसादत्रिपाठिमहोदया:, प्रो. रामपाल शर्मा, प्रो. अनन्तरामशास्त्रि-महोदया:, प्रो. विनोदकुमारशर्ममहोदयाश्च आसन्। संगोष्ठ्या: अध्यक्षा: प्रो. वासुदेवशर्ममहोदया: आसन् ते एव संयोजकाश्च आसन्। सत्राणां संचालका: प्रो. ईश्वरभट्टमहोदया:, डॉ. विजेन्द्रकुमारशर्मा, डॉ. शुभस्मिता मिश्रा, डॉ. रामेश्वरदयालशर्मा, डॉ. नीरज त्रिवेदी, डॉ. सुभाषश्च आसन्। २५ शोधपत्राणां प्रस्तुति: जाता।

### अन्ताराष्ट्रीयमातृभाषादिवसस्यायोजनम्

परिसरे फ़रवरीमासस्य २१तमे दिनाङ्के अन्ताराष्ट्रियमातृभाषादिवस्यायोजनं कृतम्। एतस्मिन् एव क्रमे छात्राणां कृते 'निजभाषा उन्नति अहै, सब उन्नति का मूल' एतद्विषये भाषणस्पर्धाया: आयोजनं कृतम्। यस्मिन् विंशत्यधिका: छात्रा: भागं गृहीतवन्त: छात्रवर्गस्य भाषणस्पर्धायां प्रथमं स्थानं शास्त्रिद्वितीयवर्षस्य छात्रया निशा निर्वाणेन प्राप्तम्। तथा च द्वितीयस्थानं शिक्षाशास्त्रिप्रथमवर्षस्य छात्रेण अंकितशर्मणा प्राप्तम्। तृतीयस्थानं शिक्षाशास्त्रिप्रथमवर्षस्य छात्रा अर्चनाताण्डी प्राप्तवती। कार्यक्रमस्य संयोजनं प्रो. गजेन्द्रप्रकाशशर्मणा, सहसंयोजनं सञ्चालनं च डॉ. दिनेशयादवेन कृतम्।

### अखिलभारतीयमल्लयुद्धस्पर्धायां संस्थानस्य प्रतिभागिता

हरियाणाप्रान्तस्य सिरसानगरे फ़रवरीमासस्य २५-२७ दिनाङ्कयो: मध्ये अन्तर्विश्वविद्यालयीया अखिलभारतीयमल्लयुद्धस्पर्धा आयोजिता। अस्यां प्रतियोगितायां राष्ट्रियसंस्कृतसंस्थानस्य दलेन भाग: गृहीत:। अस्य दलस्य प्रबन्धक: शिक्षाशास्त्रविभागस्य डॉ. दिनेशयादवमहोदय: आसीत्। संस्थानस्य छात्रा: रोशनलाल:, सुरेशकुमार:, ख्यालीरामसैनी, आलोककुमारश्च भागं गृहीतवन्त:। संस्थानस्य छात्राणां प्रदर्शनं संतोषजनकमासीत्।

### व्याकरणशास्त्रे राष्ट्रियसंगोष्ठी विशिष्टं व्याख्यानञ्च

फ़रवरीमासस्य २५-२६ दिनाङ्कयो: व्याकरणशास्त्रे राष्ट्रियसंगोष्ठी विशिष्टं व्याख्यानं च समायोजितम्। अस्या: संगोष्ठ्या: विषय: "वैयाकारणदार्शनिकसिद्धान्तानाञ्च समीक्षणम्" आसीत्। अस्या: संगोष्ठ्या: विशिष्टा: वक्तार: प्रो. अर्कनाथचौधरी, प्रो. सत्यप्रकाशदुबे (जोधपुरजनपदीय:), डॉ. भोलाझा (हरिद्वारजनपदीय:), प्रो. अशोकतिवारी, डॉ. प्रमोदशर्मा, डॉ. दयारामदास:, डॉ. रामबाबू पाण्डेय: च आसन्। अस्या: संगोष्ठ्या: संयोजक: विभागाध्यक्ष: प्रो. शिवकान्तझामहोदय: आसीत्। अस्मिन् अवसरे विषयस्य प्रवर्तक: प्रो. श्रीधरमिश्रमहोदय:, सत्रस्य संचालका: डॉ. विष्णुकान्त पाण्डेय:, डॉ. पंकज पुरोहित: डॉ. साधनाशर्मा चासन्। अस्यां संगोष्ठ्यां धन्यवादं डॉ. कमलचन्द्रयोगीमहोदयेन ज्ञापितम्। तत्र शोधपत्रप्रस्तोतार: एकसप्तति: आसन्।

### शिक्षाशास्त्रविभागस्य राष्ट्रियसंगोष्ठी

राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे शिक्षाशास्त्रविभागे मार्चमासस्य ४-५ दिनाङ्कयो: राष्ट्रियसंगोष्ठी समायोजिता। अस्या: संगोष्ठ्या: विषय: 'समावेशात्मकशिक्षाया: क्रियान्विति: संभावनाश्च' आसीत्। अस्यां संगोष्ठ्यां विशिष्टा: वक्तार: प्रो. आर.पी. पाठक:, प्रो. अमिताभशर्मा, प्रो. गजेन्द्रप्रकाशशर्मा, प्रो. राधारानी सक्सेना, प्रो. सोहनलालपाण्डेय:, प्रो. संतोषमित्तल:, डॉ. विभा कौशिक:, डॉ. मीनू अग्रवाल:, डॉ. के. साम्बशिवमूर्ति: च आसन्।

अस्याः संगोष्ठ्याः अध्यक्षता परिसरप्राचारेण डॉ. प्रकाशपाण्डेयमहोदयेन निर्वोढ़ा। सत्रस्य संचालकाः डॉ. लीनातिवारी, डॉ. रेखाशर्मा, डॉ. दिनेशयादवः, डॉ. कैलाश सैनी, डॉ. शीशरामः, डॉ. हरिओमशर्मा, डॉ. विजयदाधीचमहोदयश्च आसन्। अस्याः संगोष्ठ्याः संयोजकः प्रो. वाई. एस्. रमेशमहोदयः आसीत्। तत्र एकषष्टिशोधपत्राणां प्रस्तुतिः जाता।



सङ्गोष्ठ्यां मञ्चासीनाः अतिथयः

### अन्ताराष्ट्रियमहिलादिवसः

जयपुरपरिसरे मार्चमासस्य अष्टमदिनाङ्के अन्ताराष्ट्रियमहिलादिवसमालक्ष्य महिला-जागर्यायात्रा आयोजिता कार्यक्रमस्य शुभारम्भः परिसरप्राचार्येण डॉ. प्रकाशपाण्डेयमहोदयेन यात्रायाः शुभारम्भः कृतं। अस्मिन् कार्यक्रमे शिक्षाशास्त्रिच्छात्रैः वीथिनाटकानां मञ्चनेन महिला-जागरणस्य कार्यं संपादितम्। कार्यक्रमस्यास्य संयोजनं प्रो. फ़तहसिंहमहोदयः, विशेषसहयोगः डॉ. नीलातिवारी, डॉ. विजयदाधीचमहोदयः च कृतौ।



सङ्गोष्ठ्यां मञ्चासीनाः अतिथयः

### आधुनिकविभागीया राष्ट्रियसंगोष्ठी

परिसरस्य आधुनिकविभागेन मार्चमासस्य १८-१९ दिनाङ्कयोः राष्ट्रियसंगोष्ठ्याः आयोजनं कृतम्। अस्यां संगोष्ठ्यां ८० शोधपत्राणि वाचितानि। कार्यक्रमे हिन्दी-आंग्ल-राजनीति विज्ञान-शारीरिकशिक्षा-सङ्गणकविज्ञानस्य च विषये विद्वांसः स्वकीयानि पत्राणि प्रस्तुतवन्तः। संगोष्ठ्याः अध्यक्षता प्राचार्येण डॉ. प्रकाशपाण्डेयमहाभागेन कृता। संयोजनं प्रो. गजेन्द्रप्रकाशशर्मणा सत्राणां सञ्चालनञ्च डॉ. सुभाषः, श्रीमती कान्तागलानि, डॉ. सीमाअग्रवालः, डॉ. नमितामित्तलः, डॉ. नवनीतत्रिपाठी च अकुर्वन्। संगोष्ठ्यां विशिष्टातिथिरूपेण प्रो. राजेन्द्रकुमारः, प्रो. अनिलजैनः, डॉ. प्रेमशङ्करः, डॉ. प्रियन्काचौधरी, डॉ. ललितशर्मा, प्रो. भगवतीसुदेशः, प्रो. ईनाक्षिचतुर्वेदी, प्रो. अशोकशर्मा, प्रो. संतोषमित्तलः, प्रो. विजयसिंहराठौड़, प्रो. मीनूदवे, प्रो. महेन्द्रसिंहचूड़ावत, प्रो. ओमप्रकाशभड़ाना, डॉ. शेखरशर्मा च आसन्।

### वार्षिकोत्सवः

राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे वार्षिकोत्सवः मार्चमासस्य २१ दिनाङ्के, हिन्दकेसरीसभागारे आयोजितः। वार्षिकोत्सव-कार्यक्रमस्य अध्यक्षः राष्ट्रपतिसम्मानितः प्रो. हरिरामआचार्यः आसीत्। परिसरस्य वार्षिकोत्सवे वर्षस्य उपलब्धयः प्रतिवेदनरूपेण प्रस्तुताः। राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे वर्षे येऽपि छात्राः विविधासु स्पर्धासु भागं गृहीतवन्तः तेषां तासाञ्च छात्राणां सम्माननं वार्षिकोत्सवे कृतम्।

### वेदविभागे राष्ट्रियसंगोष्ठी व्याख्यानं च

मार्चमासस्य २२ दिनाङ्कतः २३ दिनाङ्कपर्यन्तम् वेदविभागे राष्ट्रियसंगोष्ठी आयोजिता। वेदविभागस्य संगोष्ठ्याः विषयः 'शास्त्रीयपरम्परायां वैदिकतत्त्वानां विवेचनम्' आसीत्। वेदसंगोष्ठ्या मुख्यवक्ता प्रो. मनोजकुमारमिश्रः, महामहोपाध्यायः प्रो. हृदयरञ्जनशर्मा च अध्यक्षः प्राचार्यः डॉ. प्रकाशपाण्डेयः, अस्याः संगोष्ठ्याः संयोजकः डॉ. धर्मेन्द्रकुमारपाठकश्च असीत्। सत्रस्य संचालनं डॉ. पवनव्यासः, डॉ. सिद्धार्थशङ्करदासः, डॉ. नीरजत्रिवेदी, डॉ. रामेश्वरदयालशर्मा च अकरोत्। वेदविभागस्य राष्ट्रियसंगोष्ठ्यां ५० शोधपत्राणि प्रस्तुतानि।

### बलिदानदिवसस्य आयोजनम्

सुखदेव-भगतसिंह-राजगुरु-इत्येतेषां स्वतन्त्रतासैनिकानां बलिदानदिवसः परिसरे मार्चमासस्य त्रयोविंशे दिनाङ्के समनुष्ठितः। कार्यक्रमेऽस्मिन् कारगिलयुद्धे स्वीकीयैः प्राणैः भारतमातुः गौरवं वर्धितवान् ले. अमितभारद्वाजस्य पितृपादाः श्री ओमप्रकाशशर्ममहाभागाः मुख्यातिथिरूपेण समागताः। मुख्यवक्तृरूपेण समाजसेवी श्री सोमकान्तशर्ममहोदयः छात्रान् राष्ट्रप्रेमविषये बोधितवान्। कार्यक्रमस्य अध्यक्षता परिसरप्राचार्येण डॉ. प्रकाशपाण्डेयमहोदयेन विहिता। कार्यक्रमसंयोजकेन प्रो. गजेन्द्रप्रकाशशर्ममहोदयेन अतिथीनां स्वागतं कृतम्। कार्यक्रमे छात्राणां कृते देशभक्तिगीत-कवितास्पर्धायाः आयोजनं कृतं तत्र अभिषेकः तृतीयपुरस्कारं, निशाजैन द्वितीयपुरस्कारं, भट्टदेवाङ्गश्च प्रथमपुरस्कारं च प्राप्तवान्। कार्यक्रमस्य सञ्चालनं सहसंयोजकेन डॉ. दिनेशकुमारयादवमहोदयेन कृतम्। अन्ते च दीपदानं, पुष्पाञ्जलिकार्यक्रमश्च सम्पन्नः।


बलिदानदिवसकार्यक्रमस्य एकं दृश्यम्

# भोपालपरिसरवार्ता

## वित्तीयसाक्षरताभियानम्

राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरे जनवरीमासस्य द्वादशदिनाङ्के वित्तीयसाक्षरताभियानम् आयोजितम्। कार्यक्रमेऽस्मिन्स्टेट बैंक ऑफ इण्डिया इत्यस्य बागमुगालियाभोपालशाखाया: प्रबन्धकेन श्री आर्.एल्. महेतामहोदयेन वित्तीय साक्षरता सभी के लिए उपयोगी इति विषये विशिष्टव्याख्यानं सम्पादितम्। प्रबन्धकेन सह श्री वैभवसरावस: महोदयोऽपि उपस्थित: आसीत्। येन वित्तसम्बन्धिकार्याणि कथं सम्पादितानि भवन्ति तेषां व्यावहारिकरूपं प्रस्तुतम्। तेन साधारणास्मार्ट इति वा चलवाण्या कैशलेस इति वित्तीयविनिमयस्य प्रक्रिया कथं सम्भवा इत्यपि बोधितम्। अवसरेऽस्मिन् परिसरप्राचार्येण प्रो.एम्.चन्द्रशेखरमहोदयेन स्वीये सम्बोधने परिसरस्य छात्रा: प्राध्यापका: कर्मकराश्चाभिप्रेरिता: यत् समेऽपि वित्तीयविनिमये आधुनिकप्रौद्योगिक्या: प्रयोगं कुर्वन्त्विति, येन आर्थिकप्रक्रिया सुगमा सरला च भवति।

## जैनदर्शनविभागीया राष्ट्रियशोधसङ्गोष्ठी


जैनदर्शनसङ्गोष्ठ्या: एकं दृश्यम्

परिसरस्य जैनविभागद्वाराजनवरीमासस्य २८-२९, २०१७ दिनाङ्के 'भारतीय साहित्य में जैन वाङ्मय के विविध आयाम' इति विषयेऽस्मिन्द्विदिवसीया राष्ट्रियशोधसङ्गोष्ठी समायोजिता। २८ दिनाङ्के आयोजितस्य उद्घाटनसत्रस्य अध्यक्षा प्रभारिप्राचार्या प्रो. प्रभादेवीचौधरी, विशिष्टातिथि: प्रो. वीरसागरजैन: जैनदर्शनविभागस्य श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य, मुख्यातिथि: श्रीकमलजैनकमलाङ्कुरश्चासीत्। सङ्गोष्ठ्या: संयोजकेन श्रीप्रतापशास्त्रिणा समन्वयकेन डॉ. पङ्कजकुमारजैनमहोदयेन च जैनदर्शनस्य विविधायामानां प्रकाशनाय सङ्गोष्ठी एक: सार्थकोपक्रम: अस्तीति प्रतिपादितम्। डॉ. संगीतागुन्देचामहोदयया समागतातिथीनाम् धन्यवाद: प्रकटित:। ९ दिनाङ्के आयोजिताया: सङ्गोष्ठ्या: समापनसत्रस्य अध्यक्ष: प्राचार्य: प्रो. एम्. चन्द्रशेखर:, विशिष्टातिथि: प्रो. अशोककुमारजैन:, अध्यक्ष: जैनबौद्धदर्शनविभागस्य, काशीहिन्दूविश्वविद्यालयस्य, सारस्वतातिथि: प्रो. सुन्दरलालजैनश्चासीत्। एतेषां विदुषां मार्मिकोद्बोधनं सर्वैरपि प्राप्तम्। धन्यवादज्ञापनं डॉ. सोमनाथसाहुना कुशलसञ्चालनञ्च श्रीप्रतापशास्त्रिणा विहितम्।

## आधुनिकविषयविभागीया राष्ट्रियशोधसङ्गोष्ठी


आधुनिकविषयराष्ट्रियसङ्गोष्ठ्याम्
आसीना: अतिथय:

'विविध कौशल विकास' इति शीर्षकोपेताया: द्विदिवसीयराष्ट्रियशोधसङ्गोष्ठ्या: आयोजनम्फरवरिमासस्य ४, ५ दिनाङ्कयो: अभवत्। ४ दिनाङ्के आयोजितस्य उद्घाटनसत्रस्य अध्यक्ष: परिसरप्राचार्य: प्रो. एम्. चन्द्रशेखर:, मुख्यातिथि: डॉ. रजनीपाण्डेय:, अतिथिश्च डॉ. शुक्ला मुखर्जी आसीत्। ५ दिनाङ्के सङ्गोष्ठ्या: समापनसत्रस्य अध्यक्ष: प्राचार्य: प्रो. एम्. चन्द्रशेखर:, मुख्यातिथि: सुरजीतसिंहचौहान: नगरनिगमाध्यक्ष:, सारस्वतातिथि: प्रो. पी. के. गुप्ता च आसीत्। एभिर्महत्त्व-पूर्णोद्बोधनम् अकारि। डॉ. अवनीशर्मणा धन्यवादज्ञापनं श्रीसुमतिसक्सेनाद्वारा च सङ्गोष्ठ्या: कुशलसञ्चालनं कृतम्।

## शिक्षाशास्त्रविभागीया राष्ट्रियशोधसङ्गोष्ठी

'शिक्षणाधिगमप्रक्रियायै सूचनासम्प्रेषणप्रविधि:' इति विषयमाधृत्य शिक्षाविभागेन फरवरीमासस्य ११, १२ दिनाङ्कयो: द्विदिवसीया राष्ट्रियशोधसङ्गोष्ठी समाचरिता। फरवरीमासस्य ११ दिनाङ्के समाचरिते उद्घाटनसत्रे स्वागतभाषणं विभागाध्यक्षया प्रो. प्रभादेवीचौधरी-महोदयया विहितम्। सत्रस्यास्य अध्यक्ष: प्राचार्य: प्रो. एम्. चन्द्रशेखर:, मुख्यातिथि: डॉ. एन्. के. शर्मा, सचिव: प्राविधिक: शिक्षाविभाग:, सारस्वतातिथि: पूर्वविभागाध्यक्ष: प्रो. वेदनारायणचौधरीमहोदय: च आसीत्। सत्रस्य प्रभाविसञ्चालनं डॉ. दातारामपाठकेन धन्यवादज्ञापनञ्च च डॉ. श्रीगोविन्दपाण्डेयेन कृतम्। १२ दिनाङ्के समाचरिते सङ्गोष्ठ्या: सम्पूर्तिसत्रे अध्यक्ष: प्राचार्य: प्रो. एम्. चन्द्रशेखर:, मुख्यातिथि: प्रो. चाँदकिरणसलुजामहोदय:, पूर्वाचार्य:, शिक्षाविभाग:, केन्द्रीयशिक्षासंस्थानम्, नवदेहली, सारस्वतातिथि: प्रो. अनिलकुमार:, आचार्य:, च आसीत्। सत्रस्यास्य कुशलसञ्चालनं डॉ. डम्बरुधरपतिना धन्यवादज्ञापनञ्च श्रीप्रतापशास्त्रिणा सम्पादितम्।

## ज्योतिषविभागीया राष्ट्रियशोधसङ्गोष्ठी

'वर्तमान सन्दर्भ में संहिता ज्योतिष की प्रासंगिकता' इति विषयमवलम्ब्य फरवरीमासस्य १८-१९ दिनाङ्के द्विदिवसीया राष्ट्रियशोधसङ्गोष्ठी आयोजिता ज्योतिषविभागेन। १८ दिनाङ्के अस्या: सङ्गोष्ठ्या: उद्घाटनसत्रे स्वागतभाषणं विभागाध्यक्षेण प्रो. भारतभूषण-मिश्रेण प्रस्तुतम्। सत्रस्य अध्यक्ष: प्राचार्य: प्रो. एम्. चन्द्रशेखर:, मुख्यातिथि: श्री श्रीधरपराड़कर: राष्ट्रियसङ्घटनमन्त्री अखिलभारतीय-



सभां संबोधयति अतिथिमहोदयः

साहित्यपरिषद्, सारस्वतातिथिः श्री एस्. एस्. लालश्चासीत्। सत्रस्य प्रभाविसञ्चालनं प्रो. हंसधर झामहोदयेन धन्यवादज्ञापनञ्च डॉ. भूपेन्द्रपाण्डेयेन विहितम्। १९ दिनाङ्के आयोजितायाः सङ्गोष्ठ्याः समापनसत्रे सत्राध्यक्षेण प्राचार्येण प्रो. एम्. चन्द्रशेखरेण, मुख्यातिथिना श्रीमहेशशुक्लेन सारस्वतातिथिना प्रो. रमाकान्तपाण्डेयेन च सभा सम्बोधिता। सत्रस्य कुशलसञ्चालनं डॉ. भूपेन्द्रपाण्डेयेन, प्रो. भारतभूषणमिश्रेण च धन्यवादज्ञापनम् अकारि।

## मातृभाषादिवसः

भोपालपरिसरे फरवरीमासस्य २१ दिनाङ्के मातृभाषादिवसः आचरितः। अवसरेऽस्मिन् केन्द्रीयलोकनिर्माणविभागः, भोपालम्, इत्यस्य ए. डी.जी. श्री एस.के. रुस्तोगीमहोदयः मुख्यातिथिः, केन्द्रीयलोकनिर्माणविभागस्य, भोपालस्यैव श्री अनिलकुमार आहूजा च विशिष्टातिथिः आसीत्। सारस्वतातिथित्वेन च दैनिकभास्करभोपालस्य वरिष्ठसम्पादकः श्री मनीषदीक्षितः, ई.टी.वी., म.प्र. छत्तीसगढ़ः इत्यस्य च वरिष्ठसम्पादकः श्रीप्रवीणदुबे चोपस्थितौ आस्ताम्। कार्यक्रमस्याध्यक्षता भोपालपरिसरस्य प्राचार्येण प्रो. एम्. चन्द्रशेखरेण आचरिता। अस्मिन्नवसरे आयोजितनिबन्धगायनस्पर्धयोः विजेतारः छात्राः पुरस्कृताः। अस्मिन्नेव कार्यक्रमे भाषायाः क्षेत्रे तेषाम् उल्लेखनीययोगदानाय श्रीरुस्तोगी, श्रीआहूजा, श्रीदीक्षितः श्रीदुबेमहोदयाश्चापि सम्मानिताः। कार्यक्रमस्यास्य सञ्चालनं डॉ. अर्चनाचौहानमहोदयया कृतम्। मातृभाषादिवसस्यास्य आयोजनस्य संयोजिका आधुनिकविषयविभागाध्यक्षा डॉ. अर्चनादुबे आसीत्।



मञ्चासीनाः प्राचार्याः अतिथयश्च

## व्याकरणविभागीया राष्ट्रियशोधसङ्गोष्ठी

द्विदिवसीया राष्ट्रियशोधसङ्गोष्ठी फरवरिमासस्य २५-२६ दिनाङ्के आयोजिता। २५ दिनाङ्के उद्घाटनसत्रस्य अध्यक्षः परिसरप्राचार्यः प्रो. एम्. चन्द्रशेखरः, मुख्यातिथिः परिसरसंस्थापकः, पूर्वप्राचार्यः प्रो. आजादमिश्रः सारस्वतातिथिश्च आचार्यः डॉ. रमाकान्तपाण्डेयः, संस्कृतविद्याधर्मविज्ञानसङ्कायः, काशीहिन्दूविश्वविद्यालयः, वाराणसी आसीत्। सत्रस्य सफलं सञ्चालनं डॉ. प्रदीपकुमारपाण्डेयेन धन्यवादज्ञापनञ्च श्री आस्तिकद्विवेदिना आचरितम्। २६ दिनाङ्के आयोजिते समापनसत्रे अध्यक्षः प्राचार्यः प्रो. एम्. चन्द्रशेखरः, मुख्यातिथिः प्रो. आजादमिश्रः सारस्वतातिथिः डॉ. रमाकान्तपाण्डेयश्चासीत्। डॉ. कैलाशचन्द्रदाशेन सत्रस्य कुशलसञ्चालनं, डॉ. नरेशकुमारपाण्डेयेन च कृतज्ञताज्ञापनं विहितम्। उद्घाटनसत्रे विभागाध्यक्षः प्रो. सुबोधशर्मणा समापनसत्रे च सङ्गोष्ठीसचिवेन डॉ. प्रदीपकुमारपाण्डेयेन स्वागतभाषणमकारि।

## अन्तःपरिसरीयनाट्यस्पर्धायां भागगृहीतृणाम् अभिनन्दनम्

राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरेण चतुर्दशराष्ट्रियनाट्यमहोत्सवे नवदेहल्यां प्रो. राधावल्लभत्रिपाठिना विरचितं तण्डुलप्रस्थीयम् (पूसभर चावल) इति नाटकस्य प्रस्तुतौ प्रथमपुस्कारः प्राप्तः। अकालस्य विषमतां परिलक्षयन् अस्य नाटकस्य सन्देशः आसीत् यत् जीवनं तदैव आनन्दयुतं भवति यदा व्यक्तेः उदरमन्नयुतं स्यात्। अन्नं जलञ्च जीवनस्य मूलभूतावश्यकता अस्ति। एतदर्थं मानवेन एतादृशः प्रयत्नो विधेयो येन जलान्नयोः सर्वदैव सदुपयोगस्स्यात् समुचितं संरक्षणञ्च भवेदिति। प्राचार्यस्य प्रो. एम्. चन्द्रशेखरस्य कुशलमार्गदर्शने नेतृत्वे च नाटकस्य निर्देशनं भोपालपरिसरस्य साहित्यविभागाध्यक्षेण प्रो. जनार्दनपाण्डेयमणिना कृतम्। सहनिर्देशनञ्च डॉ. सनन्दनत्रिपाठिनः डॉ. देवेन्द्रपाठकस्य चासीत्। नाटके सङ्गीतप्रस्तुतिः डॉ. संजयद्विवेदिना श्रीमनोजपाटीदारेण च कृता।

## साहित्यविभागीया राष्ट्रियशोधसंगोष्ठी

साहित्यविभागद्वारा 'संस्कृतकाव्यशास्त्रे रसः' विषयेऽस्यमार्चमासस्य ४-५ दिनाङ्कयोः द्विदिवसीया राष्ट्रियशोधसङ्गोष्ठी आयोजिता। ४ दिनाङ्के समायोजिते उद्घाटनसत्रे आध्यक्षं प्राचार्यः प्रो. एम्. चन्द्रशेखरः, मुख्यातिथित्वं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, कुलपतिचरः प्रो. अभिराजराजेन्द्रमिश्रमहोदयः, सारस्वतातिथिः जयपुरपरिसरस्य साहित्यविभागाध्यक्षः प्रो. रामकुमारशर्ममहोदयः च आसीत्। कार्यक्रमस्यान्ते डॉ. मोहिनी अरोरामहोदयया धन्यवादः ज्ञापितः। सत्रस्यास्य सञ्चालनं डॉ. सनन्दनकुमारत्रिपाठिना कृतम्। ५ दिनाङ्के समायोजिते समापने सत्रे अध्यक्षः प्राचार्यः प्रो. एम्. चन्द्रशेखरः, मुख्यातिथिः प्रो. रमाकान्तशुक्लः सारस्वतातिथिश्च डॉ. प्रभुदयालमिश्रः आसीत्। डॉ. धर्मेन्द्रसिंहदेवेन सङ्गोष्ठ्याः प्रतिवेदनं प्रस्तुतम्। डॉ. सनन्दनकुमारत्रिपाठिना कुशलसञ्चालनं, कृतज्ञताज्ञापनञ्च डॉ. मोहिनी अरोरा इत्यनया कृतम्।

## वार्षिकोत्सवः

मार्चमासस्य २१.०३.२०१७ दिनाङ्के परिसरस्य वार्षिकोत्सवस्यायोजनमभवत्। यस्मिन् मध्यप्रदेशस्य पुलिसमहानिदेशकचराः माननीयाः श्रीसुभाषचन्द्रत्रिपाठिमहोदयाः सारस्वतातिथिरूपेण, परिसरप्रचार्याः प्रो. एम्. चन्द्रशेखरमहोदयाश्चाध्यक्षाः आसन्। सरस्वतातिथिना श्रीसुभाषचन्द्रत्रिपाठिना सर्वान् छात्रान् अनुशासनस्य महत्त्वं किमस्तीत्यवबोधितम्। स्वीयेऽध्यक्षीये उद्बोधने परिसरप्राचार्येण प्रो. एम्. चन्द्रशेखरेण उक्तं यत् समेऽपि छात्राः ज्ञानस्य विकासं कुर्वन्तः परिवारम्प्रति, समाजम्प्रति राष्ट्रम्प्रति च स्वीयानि कर्त्तव्यानि अवगच्छेयुरिति। अवसरेऽस्मिन् परिसरे आवर्षम् आयोजितानां शैक्षिकक्रीडासांस्कृतिकादिप्रतियोगितानां विजेतारः पुरस्कृताः। नाट्यशास्त्रानुसन्धान-केन्द्रभोपालपरिसरस्य तत्त्वावधाने छात्रैः पूर्वरङ्गमञ्चनं कृतम्। ततः परं छात्रैः संस्कृतनाटकं 'तण्डुलप्रस्थीयम्' इत्यस्य प्रस्तुतिः कृता।

## शैक्षणिकलेखापरीक्षणम्

मार्चमासस्य २२ दिनाङ्के परिसरस्य शैक्षणिकलेखापरीक्षणं सम्पन्नमभवत्। अध्ययनाध्यापनयोः उत्तरोत्तरसंवर्धनाय आन्तरिक-गुणवत्तासंवर्धनस्य त्रिसदस्यीयसमित्या निरीक्षणमिदं सम्पादितम्। समितौ पूर्वकुलपतिः प्रो. वे. कुटुम्बशास्त्री, प्रो. सुदेशशर्मा, प्रो. वाई. एस्. रमेशश्चासीत्। अनया समित्या भोपालपरिसरे पाठ्यक्रमस्य अध्ययनाध्यापनसम्बन्धिततथ्येषु, पाठ्यसहगाम्यन्यशैक्षणिकसांस्कृतिकक्रिया-कलापेषु, भौतिकसंसाधनेषु छात्रसङ्ख्यादिषु महत्त्वपूर्णविषयेषु चर्चा कृता।

## संस्कृतप्राविधिककार्यशालायाः आयोजनम्

परिसरस्य शिक्षाविभागेन मार्चमासस्य २३ दिनाङ्के एकदिवसीया संस्कृतप्राविधिककार्यशाला आयोजिता। कार्यशालेयं त्रिषु सत्रेषु सम्पादिता। प्रथमसत्रे नागपुरात् समागतः प्रो. चन्द्रगुप्तश्रीधरवर्णेकरमहोदयेन संस्कृतकलनविधिः (Sanskrit Algorithms) विषयं स्वीकृत्य प्रमाणपुरस्सरं व्याख्यानं दत्तम्। उक्तञ्च यदि भारतीयवैदिकगणितं न स्यात्तर्हि सङ्गणकस्य कल्पनाऽपि असम्भवेति। द्वितीयसत्रे मुम्बईनगरात् समागतेन प्रो. मदनमोहनझामहोदयेन संस्कृतमोबाइल एप्लीकेशन - परिचयः निर्माणश्च शीर्षकं स्वीकृत्य स्वीयाः विचाराः प्रस्तुताः। तृतीये अन्तिमसत्रे च अहमदाबादात् समागतेन श्रीनेहलदवेमहोदयेन संस्कृतविकिपीडिया इत्यस्य सैद्धान्तिकप्रायोगिकपक्षश्चोपस्थापितः।

## एकदिवसीया राष्ट्रियशोधसङ्गोष्ठी

परिसरस्य शिक्षाविभागेन मार्चमासस्य २४ दिनाङ्के 'शिक्षा समाजश्च' इति शीर्षकोपेता एकदिवसीयराष्ट्रियशोधसङ्गोष्ठी समाचरिता। शिक्षाजगति लब्धप्रतिष्ठितैः प्रो. कामताप्रसादपाण्डेयमहोदयैः प्राच्यभारतीये समाजे शिक्षा, वैश्विकसमाजे शिक्षा चेति विषयद्वयमाधृत्य सारगर्भिते द्वे व्याख्याने प्रस्तुते। तत्र तैः प्राच्यभारतीयसन्दर्भे उपनिषदामुदाहरणानि इति विषयोपस्थापितः। वैश्विकसन्दर्भे च प्राच्यपाश्चात्यशैक्षिकविचारैः स्वीयानुभवैश्च छात्राः अभिप्रेरिताः। एकमन्यं विशिष्टं व्याख्यानं प्रो. रमेशदवेमहोदयानाम् अभवत्। तैः शिक्षा समाजश्च विषयं स्वीकृत्य समाजे शिक्षायाः व्यावहारिकं स्वरूपं कथं भवतीति विभिन्नानां व्यावहारिकोदाहरणानां माध्यमेन छात्रैस्सह प्रश्नोत्तरमाध्यमेन च विषयः समुपस्थापितः। परिसरप्राचार्येण विभागीयैः आचार्यैश्चापि छात्राः सम्बोधिताः।

# श्रीरणवीपरिसरवार्ता

## राष्ट्रिययुवदिवसस्यायोजनम्

२४.०१.२०१७ तमे दिनाङ्के श्रीरणवीरपरिसरे राष्ट्रिययुवदिवसस्य समायोजनं परिसरप्राचार्यस्य प्रो. बच्चाभारतीमहोदयस्याध्यक्ष्ये अभवत्। कार्यक्रमेऽस्मिन् 'एड्स कन्ट्रोल-सोसइटी-जम्मूकाश्मीरस्य' निदेशकः मुख्यातिथित्वेनोपस्थितः आसीत्। कार्यक्रमस्यास्य संयोजकः डॉ. मदनकुमारझा सहायकाचार्यः, शिक्षाविभागः आसीत्।

## वसन्तपञ्चम्यां सरस्वतीपूजनम्

वसन्तपञ्चम्याः अवसरे परिसरे परिसरप्राचार्यणामाध्यक्ष्ये 'सरस्वतीपूजा' ०१.०२.२०१७ दिनाङ्के आयोजिता। अस्मिन्नवसरे परिसरीयाः अध्यापकाः कर्मचारिणः छात्राश्च समुपस्थिताः आसन्।

## गणतन्त्रदिवसस्यायोजनम्

२६.०१.२०१७ दिनाङ्के परिसरे गणतन्त्रदिवसः आयोजितः। अवसरेऽस्मिन् परिसरप्राचार्येण प्रो. बच्चाभारतीमहोदयेन ध्वजारोहणं कृतम्। कार्यक्रमेऽस्मिन् परिसरस्य प्राध्यापकाः, कर्मचारिणः, छात्राश्च उपस्थिताः आसन्।

## ज्योतिषविभागीया राष्ट्रिया संगोष्ठी

परिसरे २५.०१.२०१७ दिनाङ्के 'कालविचारः' इति विषयमवलम्ब्य ज्योतिषविभागस्य एकदिवसीया राष्ट्रियसङ्गोष्ठी समायोजिता। सङ्गोष्ठीयं परिसरप्राचार्यस्य प्रो. बच्चा भारतीमहोदयस्याध्यक्ष्ये, जम्मूविश्वविद्यालयस्य संस्कृतविभागस्य सहाचार्यस्य डॉ. रामबहादुर-शुक्लमहोदयस्य मुख्यातिथित्वे तथा ज्योतिषविभागाध्यक्षस्य प्रो. प्रभातकुमारमहापात्रमहोदयस्य संयोजकत्वे सम्पन्नाभवत्। अस्यां सङ्गोष्ठ्यां परिसरीयैः अध्यापकैः सह जम्मूविश्वविद्यालयस्य आचार्यैः छात्रैश्च शोधपत्राणां वाचनं कृतम्।

## साहित्यविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी

परिसरे ०४.०२.२०१७ – ०५.०२.२०१७ दिनाङ्कयोः "संस्कृतसाहित्यवाङ्मयेऽभिव्यञ्जनासौन्दर्यम्" इति विषयमभिलक्ष्य साहित्यविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी परिसरप्राचार्यस्याध्यक्ष्ये समायोजिता अभवत्। सङ्गोष्ठीयं त्रिषु सत्रेषु सञ्चालिता। प्रथमसत्र-स्याध्यक्ष्यं व्याकरणविभागाध्यक्षेण प्रो. हरिनारायणतिवारिवर्येण, द्वितीयसत्रस्याध्यक्ष्यं जम्मूविश्वविद्यालयस्य संस्कृतविभागस्य भूतपूर्वाध्यक्षेण वर्तमानकलासंकायाध्यक्षेण च प्रो. केदारनाथशर्ममहोदयेन, समापनात्मकतृतीयसत्रस्याध्यक्ष्यं साहित्यविभागाध्यक्षेण डॉ. सतीशकुमारकपूर-महोदयेन कृतम्। समापनसत्रे मुख्यातिथित्वेन श्रीरणवीरपरिसरस्य प्राचार्यचराः प्रो. प्रियतमचन्द्रशास्त्रिवर्याः उपस्थिताः आसन्। दिनद्वयव्यापिनि कार्यक्रमेऽस्मिन् न केवलं परिसरीयैः आचार्यैः शोधच्छात्रैश्च अपि तु जम्मूविश्वविद्यालयस्य संस्कृतविभागीयैः आचार्यैः शोधच्छात्रैश्च शोधपत्राणि प्रस्तुतानि। इयं सङ्गोष्ठी साहित्यविभागाध्यक्षस्य डॉ. सतीशकुमारकपूरमहोदयस्य संयोजकत्वे समायोजिताऽऽसीत्।

## शिक्षाशास्त्रविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी

परिसरे २५.०२.२०१७ – २६.०२.२०१७ दिनाङ्कयोः "शिक्षणाधिगमयोः नूतनप्रवृत्तयः" इति विषयमाश्रित्य शिक्षाशास्त्रविभागेन द्विदिवसीया राष्ट्रिया सङ्गोष्ठी परिसरप्राचार्यस्य शिक्षाशास्त्रविभागस्य च प्रो. बच्चाभारतीमहोदयस्याध्यक्षे संयोजकत्वे च जाते उद्घाटनसत्रे मुख्यातिथित्वेन वेदव्यासपरिसरस्य प्राचार्याः प्रो. लक्ष्मीनिवासपाण्डेयाः, विशिष्टातिथित्वेन च वाराणसीस्थस्य सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य शिक्षाशास्त्रविभागाध्यक्षाः प्रो. पी.एन्. सिंहमहोदयाः समुपस्थिताः आसन्। अस्यां सङ्गोष्ठ्यां वेदव्यासपरिसरात् डॉ. गणेशशङ्करविद्यार्थिवर्यः, भोपालपरिसरात्, प्रो. नगेन्द्रनाथझा-महोदयः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठात् डॉ. प्रेमसिंहसिकरवारः, उत्तराखण्डसंस्कृतविश्वविद्यालयात्, डॉ. सुमनप्रसादभट्टश्च भागं गृहीतवन्तः। एवञ्च शिक्षाशास्त्रविभागीयैः परिसरीयाध्यापकैः छात्रैश्च शोधपत्राणि प्रस्तुतानि।

## आधुनिकविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी

०३.०३.२०१७ – ०४.०३.२०१७ दिनाङ्कयोः परिसरे 'भक्तिः' इति विषयमवलम्ब्य आधुनिकविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी परिसरप्राचार्यस्याध्यक्ष्ये सम्पन्नाऽभवत्। सङ्गोष्ठ्याः उद्घाटनं मुख्यातिथित्वेन समागतायाः जम्मूविश्वविद्यालयस्य डोगरीविभागस्याध्यक्षायाः प्रो. अर्चनाकेसरमहोदयायाः करकमलयोः अभवत्। कार्यक्रमेऽस्मिन् मुख्यवक्तृत्वेन भोपालस्थस्य अटलविहारीवाजपेयीहिन्दीविश्वविद्यालयस्य राजनीतिविज्ञानविभागास्याध्यक्षः प्रो. पवनशर्मा समागतः आसीत्। अस्यां सङ्गोष्ठ्यां परिसरीयैः अध्यापकैः सह जम्मूविश्वविद्यालयात् प्रो. परमेश्वरीशर्मणा केन्द्रीयविश्वविद्यालयजम्मूतः डॉ. गोविन्दइनखियामहोदयेनापि शोधपत्राणि प्रस्तुतानि। इयं सङ्गोष्ठी आधुनिकविभागाध्यक्षस्य डॉ. शरत् चन्द्रशर्मणः संयोजकत्वे सम्पन्ना अभवत्।

## सर्वदर्शनविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी

०५.०३.२०१७ – ०६.०३.२०१७ दिनाङ्कयोः सर्वदर्शनविभागेन 'दर्शनशास्त्रे कार्यकारणवादः' इति विषयमाश्रित्य द्विदिवसीया राष्ट्रिया सङ्गोष्ठी समायोजिता। अस्याः सङ्गोष्ठ्याः उद्घाटनं मुख्यातिथित्वेन नवदेहलीस्थश्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठतः समागतैः प्रो. प्रभाकरप्रसादमहोदयैः कृतम्। समापनसत्रे च देवप्रयागस्य श्रीरघुनाथकीर्तिपरिसरस्य प्राचार्याः प्रो. के.बी. सुब्बारायुडुमहोदयाः मुख्यातिथित्वेन समागताः आसन्। कार्यक्रमस्याध्यक्षं परिसरप्राचार्यैः कृतम्। संयोजनञ्च सर्वदर्शनविभागस्याध्यक्षेण सहायकचार्येण डॉ. कृष्णमुरारिमणित्रिपाठिना कृतम्। अवसरेऽस्मिन् कटरास्थात् श्रीमातावैष्णोदेवीविश्वविद्यालयात् डॉ. अनिलकुमारतिवारी, डॉ. मधुमङ्गलचतुर्वेदी, जम्मूविश्वविद्यालयात् प्रो. केदारनाथशर्मा, डॉ. राबहादुरशुक्लश्चापि शोधपत्रप्रस्तुतिं कृतवन्तः।

## श्रीशङ्करशास्त्रार्थपरिषदः आयोजनम्

विगतवर्षाणीव वर्षेऽस्मिन्नपि श्रीरणवीरपरिसरे श्रीशङ्करशास्त्रार्थपरिषदः आयोजनं कृतम्। अस्याः परिषदः द्वितीयमधिवेशनं ०२.०२.२०१७ दिनाङ्के व्याकरणशास्त्रमधिकृत्य प्रवृत्तम्। अस्मिन् अधिवेशने व्याकरणविभागाध्यक्षेण प्रो. हरिनारायणतिवारिवर्येण, विभागीयैः, अध्यापकैः डॉ. सच्चिदानन्दशर्मणा, डॉ. हरिशंकरपाण्डेयेन, डॉ. अम्बरीशकुमारमिश्रेण च व्याकरणविषयमवलम्ब्य शास्त्रार्थस्योपस्थापनं कृतम्।

तृतीयाधिवेशनं २३.०२.२०१७ दिनाङ्के ज्योतिषशास्त्रमवलम्ब्य प्राचलत्। यस्मिन् ज्योतिषविभागाध्यक्षेण डॉ. प्रभातकुमारमहापात्रमहोदयेन विभागीयैः अध्यापकैः डॉ. रतनकुमारपाण्डेय-डॉ. निगमपाण्डेय-महोदयैश्च ज्योतिषशास्त्रविषयकशास्त्रार्थः प्रस्तुतः।

श्रीशङ्करशास्त्रार्थपरिषदः चतुर्थमधिवेशनं ०९.०३.२०१७ दिनाङ्के साहित्यविभागपक्षतः साहित्यशास्त्रमधिकृत्य समायोजितम्। अधिवेशनेऽस्मिन् साहित्यशास्त्रस्य विविधबिन्दूनवलम्ब्य साहित्यविभागाध्यक्षेण डॉ. सतीशकुमारकपूरवर्येण सहायकाचार्येण डॉ. तेजनाथपौडेलेन शास्त्रार्थमुपस्थापितम्। पञ्चमेऽधिवेशने सर्वदर्शनविभागीयैः आचार्यैः, डॉ. कृष्णमुरारिमणित्रिपाठि, डॉ. ज्योतिप्रकाशनन्दैश्च दर्शनशास्त्रमधिकृत्य शास्त्रार्थोपस्थापनं २०.०३.२०१७ दिनाङ्के कृतम्। अस्याः परिषदः आध्यक्ष्यं परिसरप्राचार्येण कृतम् एवञ्च परिषदः संयोजकः डॉ. प्रभातकुमारमहापात्रः आसीत् ज्योतिषविभागाध्यक्षः, सहसंयोजकौ डॉ. तेजनाथपौडेलः डॉ. आशीषकुमारत्रिपाठी च आस्ताम्।

## विशिष्टव्याख्यानमालायाः आयोजनम्



अतिथीनां सम्मानं विदधानः प्राचार्यः

परिसरे २२.०२.२०१७ दिनाङ्के साहित्यविभागीयाः श्रीशारदाविशिष्टिव्याख्यानमालायाः समायोजनमभूत् परिसरप्राचार्यस्याध्यक्ष्ये समायोजितेऽस्मिन् कार्यक्रमे पद्मश्रीः प्रो. रमाकान्त-शुक्लमहोदयेन "अर्वाचीनसंस्कृतस्य चत्वारिंशद्वर्षाणि" इति विषयमवलम्ब्य व्याख्यानं प्रस्तुतम्।

०२.०३.२०१७ दिनाङ्के शिक्षाशास्त्रविभागेन विशिष्टव्याख्यानमालायाः आयोजनं कृतम्। कार्यक्रमेऽस्मिन् राष्ट्रिय-अध्यापक-शिक्षापरिषदः पूर्वनिदेशकेन प्रो. जगमोहनसिंहराजपूतमहोदयेन 'आधुनिकशिक्षणम्' इति विषयमवलम्ब्यं व्याख्यानं प्रदत्तम्।

०३.०३.२०१७ दिनाङ्के आधुनिकविभागेन विशिष्टव्याख्यानमाला आयोजिता। अवसरेऽस्मिन् भारतीयराजनीति-विज्ञानपरिषदः महासचिवेन कोषाध्यक्षेण च प्रो. सञ्जीवकुमारशर्ममहोदयेन "भारत में संवाद एवं विमर्श, परम्परा एवं वर्तमान" इति विषयमवलम्ब्य व्याख्यानं प्रस्तुतम्।

२०.०३.२०१७ दिनाङ्के सर्वदर्शनविभागेन व्याख्यानमालायाः आयोजनं कृतम्। कार्यक्रमेऽस्मिन् वाराणसीस्थस्य सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य न्यायशास्त्रविभागाध्यक्षेण प्रो. रामपूजनपाण्डेयवर्येण "न्यायवैशेषिकत्त्वम्" इति विषय-मवलम्ब्य व्याख्यानं प्रस्तुतम्। इयं व्याख्यानमाला परिसरप्राचार्यस्याध्यक्षे समायोजिता। अस्याः व्याख्यानमालायाः संयोजकः ज्योतिषविभागाध्यक्षः डॉ. प्रभातकुमारमहापात्रः, सहसंयोजकश्च, डॉ. ज्योतिप्रकाशनन्दः आसीत्।

## क्रीडासप्ताहस्यायोजनम्

परिसरे वर्षेऽस्मिन् १६.०२.२०१७ दिनाङ्कतः २२.०२.२०१७ पर्यन्तं क्रीडासप्ताहस्यायोजनमभवत्। साप्ताहिके कार्यक्रमेऽस्मिन् परिसरीयैः छात्रैः छात्राभिश्च विविधक्रीडास्पर्धासु सोत्साहं भागः गृहीतः।

## मातृभाषादिवसः

२१.०२.२०१७ दिनाङ्के परिसरे मातृभाषादिवसः परिसरप्राचार्यस्याध्यक्ष्ये सोत्साहं समायोजितः। कार्यक्रमेऽस्मिन् छात्राणां कृते विविधस्पर्धाः आयोजिताः।

## वार्षिकोत्सवस्यायोजनम्



वार्षिकपत्रिकां लोकाय अपर्यन्तः अतिथयः

मार्चमासस्य २३ दिनाङ्के वार्षिकोत्सवः सम्पन्नः। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन जम्मूकश्मीरप्रदेशस्य उपमुख्यमन्त्री डॉ. निर्मलसिंहवर्यः सारस्वतातिथित्वेन श्रीरणवीरपरिसरस्य प्राचार्यचरः राष्ट्रपतिसम्मानितः प्रो. विश्वमूर्तिशास्त्रिवर्यः, विशिष्टातिथित्वेन च अन्ताराष्ट्रिय-क्रीडाक्षेत्रे लब्धकीर्तिः हैण्डबॉलक्रीडायां श्रीहरमीकसिंहवर्यः सभां व्यभूषयत्। कार्यक्रमेऽस्मिन् वार्षिकं प्रतिवेदनं ज्योतिषविभागीयेनाचार्येण डॉ. चन्द्रमौलिरैणा महोदयेन प्रस्तुतम्। कार्यक्रमस्याध्यक्षं परिसरप्राचार्येण प्रो. बच्चाभारतीमहोदयेन, डॉ. सतीशकुमारकपूरमहोदयेन कृतम्। अवसरेऽस्मिन् उपमुख्यमन्त्रिणः करकमलाभ्यां 'श्रीवैष्णवी' इति परिसरीयायाः वार्षिकपत्रिकायाः शिक्षाशास्त्रविभागस्य 'शिक्षामृतम्' इति पत्रिकायाश्च विमोचनमपि अभवत्। एवञ्च विविधस्पर्धासु प्रशस्तिभाजो विद्यार्थिनः पुरस्कारैः सभाजिताः।

# गुरुवायूरपरिसरवार्ता

## ज्यौतिषविभागीया राष्ट्रियसङ्गोष्ठी

राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूर्-परिसरस्य ज्यौतिषविभागेन फरवरीमासस्य १६, १७ दिनाङ्कयोः राष्ट्रियसंगोष्ठी विशिष्टव्याख्यानमालाकार्यक्रमश्च समायोजितः। सङ्गोष्ठ्याः उद्घाटनं राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः इत्यस्य ज्यौतिषविभागाध्यक्षाणामाचार्याणां श्रीपाद-भट्टवर्याणां करकमलाभ्यां समभवत्। ज्योतिश्शास्त्रमनेकभेदविषयम् इत्यस्मिन् सङ्गोष्ठीविषये चत्वारि सत्राणि सञ्चालितानि। बहुभ्यः परिसरेभ्यः समागताः विद्वांसः स्वकीयं शोधपत्रं प्रास्तुवन्। १७ दिनाङ्के लालबहादुरशास्त्रिसंस्कृतविद्यापीठम्, नवदेहली इत्यस्य वास्तुविभागाध्यक्षाः आचार्याः देवीप्रसादत्रिपाठिवर्याः भारतीयवास्तुशास्त्रस्य वैशिष्ट्यम् इत्यस्मिन्विषये प्रौढं व्याख्यानम् अधासिषुः।



ज्योतिषराष्ट्रियसङ्गोष्ठ्यां व्याख्यानं विदधानः प्रो. श्रीपादभट्टः

## वेदान्तविभागीया राष्ट्रियसङ्गोष्ठी

राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूरपरिसरस्य अद्वैतवेदान्तविभागेन १६.०३.२०१७ दिनाङ्कतः १७.०३.२०१७ दिनाङ्कं यावत्विशिष्टव्याख्यानमाला, जीवेश्वरस्वरूपविमर्शः इत्यमुं विषयमुररीकृत्य दिनद्वयात्मिका राष्ट्रियसङ्गोष्ठी च समायोजिता। तिरुपतिस्थराष्ट्रियसंस्कृत-विद्यापीठस्य परीक्षानियन्त्रकाः आचार्याः के.गणपतिभट्टाः कार्यक्रमम् अमुं समुद्घाट्य "अद्वैतसिद्धौमिथ्यात्वलक्षणानि" इत्यस्मिन्विषये विशिष्टव्याख्यानम् अकुर्वन्। सङ्गोष्ठ्याम् अस्यां विभिन्नेभ्यः प्रान्तेभ्यः विशिष्टाः विद्वांसः शोधच्छात्राश्च स्वकीयं शोधपत्रं प्रास्तुवन्।



अद्वैतवेदान्तराष्ट्रियसङ्गोष्ठ्यां व्याख्यानं विदधानः प्रो. के.गणपतिभट्टः

## शिक्षाशास्त्रविभागीया राष्ट्रियसङ्गोष्ठी



शिक्षाशास्त्रराष्ट्रियसङ्गोष्ठ्यां व्याख्यानं विदधानः कुलपतिः प्रो. मुरलीधरशर्मा

राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूर्-परिसरस्य शिक्षाशास्त्रविभागेन १०.०३.२०१७ दिनाङ्कतः ११.०३.२०१७ दिनाङ्कं यावत्विशिष्टव्याख्यानमाला, "संस्कृतवाङ्मये मानवाधिकारशिक्षा" इत्यमुं विषयमुररीकृत्य दिनद्वयात्मिका राष्ट्रियसङ्गोष्ठी च आयोजिता। कार्यक्रमेऽस्मिन्तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतयः आचार्याः वि.मुरलीधरशर्मवर्याः उद्घाटकाः विशिष्टव्याख्यातारश्च आसन्। संगोष्ठ्याम् उपषष्टिशोधपत्राणं प्रस्तुतीकरणमभवत्।

## न्यायविभागीया राष्ट्रियसङ्गोष्ठी

फरवरी-मासे सप्तविंशतितमे दिनाङ्के विशिष्टव्याख्यानमालाकार्यक्रमः सञ्चालितः। कार्यक्रमे तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे न्यायविभागे आचार्यस्थाने विराजमानाः सम्पत्कुमाराचार्युलुमहाभागाः प्रत्यक्षप्रमाणविचारः इति शीर्षकमधिकृत्य भाषणमकुर्वन्। अस्य कार्यक्रमस्य संयोजकः शम्भुशरणतिवारी आसीत्।

## राष्ट्रियसङ्गोष्ठी समायोजिता

२०.०३.२०१७ समायोजिता दिनाङ्के पदवृत्तिविचारः इति शीर्षकेण एकदिनात्मिका राष्ट्रियसङ्गोष्ठी प्रवर्तिता। सङ्गोष्ठ्याः अस्याः मुख्यभाषणार्थं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे न्यायविभागे अध्यक्षपदम् अलङ्कुर्वाणाः ओ.श्रीरामलालशर्ममहोदयाः मुख्यभाषणं पूर्वकं राष्ट्रियसङ्गोष्ठीमारब्धवन्तः। अस्याः सङ्गोष्ठ्याः संयोजकः राजीवलोचनशर्मा आसीत्।

## व्याकरणविभागीया राष्ट्रियसङ्गोष्ठी व्याख्यानमाला च

जनवरी मासस्य २७, २८ दिनाङ्कयोः आख्यातार्थविचारः इति विषये समायोजिता राष्ट्रियसङ्गोष्ठी। डा. बि.वी.वेङ्कटरमणः, सहाचार्यः कर्णाटकसंस्कृतविश्वविद्यालयः कार्यक्रमस्य उद्घाटनं विधाय न्यायव्याकरणयोः आख्यातार्थविचारः इति विषये मुख्यभाषणमकार्षीत्। डॉ.सि. एस्.एस्.एन् मूर्तिः, सहाचार्यः राजीवगान्धीपरिसरस्य, डा.सि.एच्.सत्यनारायणशास्त्री सहाचार्यः श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयस्य, डॉ. विष्णुनम्पूतिरिः सहाचार्यः श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयस्य, इत्येते विभिन्नसत्रेषु आध्यक्ष्यं निरवहन्। सि.एल्.सिसिली आचार्या विभागाध्यक्षा गुरुवायूरपरिसरस्य समायोजिका आसीत्। श्री नितेशकुमारद्विवेदी सञ्चालकः आसीत्। परिसरीयव्याकरणविभागेन

विशिष्टव्याख्यानमाला मार्चमासस्य त्रिंशद्-दिनाङ्के समायोजि। व्याख्यातारश्च कुलपतिचराः महामहोपाध्यायव्याकरणशास्त्रविशारदाः आचार्याः कन्दालवेङ्कटरामकृष्णमाचार्याः आसन्।

## साहित्यविभागीया राष्ट्रियसङ्गोष्ठी व्याख्यानमाला च

परिसरीयसाहित्यविभागेन जनवरिमासस्य ३० तमे दिनाङ्के आचार्याणाम् अभिनवगुप्त-वर्याणाम् सहस्राब्धिमालक्ष्य एका अन्ताराष्ट्रियसङ्गोष्ठी आयोजिता। आचार्याः कमलेशदत्त-त्रिपाठिवर्याः काशीहिन्दूविश्वविद्यालयस्य इमां सङ्गोष्ठीं समुदघाटयन्। आचार्याः वि. कुटुम्बशास्त्रिवर्याः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिचराः मुख्यभाषणम् अकुर्वन्। साहित्य-विभागेन मार्चमासस्य १५ दिने विशिष्टव्याख्यानमाला समायोजिता। तत्र आचार्याः आर्.के. पाण्डेवर्याः, राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठनिदेशकाः, समुद्घाटकाः आसन्। आचार्याः जि.एस्.आर्. कृष्णमूर्तिवर्याः तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य साहित्य-विभागाध्यक्षाः विशिष्टव्याख्यानम् अकुर्वन्।




साहित्यराष्ट्रियसङ्गोष्ठ्यां व्याख्यानं
विदधानः प्रो. वि. कुटुम्बशास्त्री

## आधुनिकविभागीया सङ्गोष्ठी

परिसरीयाधुनिकविभागेन मार्चमासस्य २०, २१ दिनयोः राष्ट्रियसंगोष्ठी विशिष्टव्याख्यानं च समायोजितम्। आचार्याः वि.एस्. रामकृष्णन्, चेन्नै कार्यक्रमम् उद्घाट्य विशिष्टव्याख्यानमकुर्वन्। कालाटीस्थ-श्रीशङ्कराचार्यसंस्कृतसर्वकलाशालायां हिन्दीविभागाध्यक्षाः आचार्याः वि.जि. गोपालकृष्णवर्याः संङ्गोष्ठ्यां मुख्यभाषणमकुर्वन्।

# राजीवगान्धीपरिसरवार्ता

१८.०१.२०१७ तः २२.०१.२०१७ पर्यन्तं राजीवगान्धीपरिसरस्य रजतमहोत्सवः महता वैभवेन सम्पन्नः। अनन्तश्रीविभूषितानां श्री श्री भारतीतीर्थमहास्वामिनाम् अनुग्रहभाषणेन कार्यक्रमोऽयं समुद्घाटितः। कर्णाटकराज्यस्य राज्यपालवर्याः महामहिमशालिनः वजूभाईवालामहोदयाः मुख्याभ्यागतत्वेनागताः। अन्ये च बहवो हि विद्वांसः देशस्य नाना प्रदेशेभ्यः अत्र समवायन्। कार्यक्रममनुलक्ष्य विविधाः गोष्ठ्यः सांस्कृतिककार्यक्रमाश्च प्रत्यहं समायोजिता आसन्। समापनोत्सवे श्री श्री विधुशेखरभारतीस्वामिनः समागत्य अनुग्रहभाषणं व्यधासिषुः। सन्दर्भेऽस्मिन् मानवसंसाधनविकासमन्त्रालयाधीनस्य राज्यसचिवाः डॉ. महेन्द्रनाथपाण्डेयवर्याः उपस्थिता आसन्।



आशीर्वादं प्रददानाः
अनन्तश्रीविभूषितभारतीतीर्थमहास्वामिनः

मार्चमासे परिसरे योगप्राकृतपालिविषयणी अन्ताराष्ट्रियसङ्गोष्ठी परिसरेऽस्मिन् समायोजिता। तत्र विदेशेभ्यः विद्वांसः समागताः। देशस्य नाना प्रदेशेभ्यः विंशत्यधिका विद्वांसः समवेता आसन्। कर्णाटकयोगविश्वविद्यालयस्य कुलपतयः कोटेमने रामचन्द्र. जी. भट्टवर्याः, कर्णाटकसंस्कृत-विश्वविद्यालयस्य कुलपतयः प्रो. पद्माशेखरवर्याश्च उद्घाटनकार्यक्रमे समागता आसन्। समापन-समारोहे मूडुबिदरेस्थजैनमठस्य चारूकीर्तिभट्टारकस्वामिनः समागत्य सम्मानभाषणं कृतवन्तः।

मार्चमासस्य २१ तमे दिनाङ्के व्याकरणविषयिणी शारदाविशिष्टव्याख्यानमाला समायोजिता। आन्ध्रप्रदेशस्य प्रसिद्धाः विद्वांसः आचार्याः रङ्गाचार्युलुमहोदयाः व्याख्यानमकार्षुः।



रजतोत्सवसमापनसत्रे मञ्चे विराजमानाः
श्रीविधुशेखरभारतीस्वामिनः

मार्चमासस्य २२ तमे दिनाङ्के वाग्वर्धिनीसमारोहः सम्पन्नः। परिषच्चतुष्टयस्य समापन-कार्यक्रमोऽपि अभूत्। योगविश्वविद्यालयस्य कुलपतयः कोटेमने रामचन्द्र. जी. भट्टवर्याः अभ्यागतत्वेन समागताः। छात्रैः विविधसांस्कृतिक-कार्यक्रमाः प्रादर्शिषत। अन्ते पण्डितराजीयमिति नाटकं छात्रैः अभिनीतम्।

मार्चमासे न्यायव्याकरणमीमांसासाहित्यवेदान्तशिक्षाशास्त्रादिविभागेषु विभागीयराष्ट्रियसङ्गोष्ठ्यः परिसरे समायोजिता आसन्। सर्वत्र परिसरस्य प्राध्यापकाः बाह्याश्च विद्वांसः पत्राणि प्रास्तुवन्।

# वेदव्यासपरिसरवार्ता

## स्वामिविवेकानन्दजयन्ती युवप्रेरणाकार्यक्रमः

स्वामिविवेकानन्दजयन्तीमुपलक्ष्य परिसरे युवप्रेरणाकार्यक्रमः १२.०१.२०१७ दिनाङ्के समायोजितः। तत्र स्वामिविवेकानन्दस्य यूनां प्रति सन्देशः इति विषयो परिसंवादकार्यक्रमः आयोजितः। परिसरीयाः छात्राः प्राध्यापकाश्च भागमगृह्णन्। अस्य संयोजकः डॉ. गणेशशङ्कर-विद्यार्थिमहोदयः आसीत्।

## गणतन्त्रदिवसः

परिसरे भारतस्य गणतन्त्रदिवसः समनुष्ठितः। बेटी बचाओ बेटी पढाओ अभियानस्य अङ्गतया गणतन्त्रदिवसे ध्वजोत्तोलनं परिसरीयच्छात्राभ्यां सुश्रीसोनाली, सुश्रीरजनी इत्येताभ्यामकारि परिसरीयप्राचार्याणामाध्यक्ष्ये। तदनु सांस्कृतिककार्यक्रमान् प्रास्तुवन् परिसरच्छात्राः अस्य कार्यक्रमस्य संयोजकः डॉ.गणेशशङ्करविद्यार्थिमहोदयः आसीत्।

## वेदान्तविभागीया राष्ट्रिया सङ्गोष्ठी

वेदव्यासपरिसरस्य वेदान्तविभागेन २८.०१.२०१७ दिनाङ्कतः २९.०१.२०१७ दिनाङ्कं यावत् श्रीशङ्करभगवत्पादस्तोत्रेषु दार्शनिकविचारः इति विषये राष्ट्रिया सङ्गोष्ठी आयोजिता। अस्यां सङ्गोष्ठ्यां प्रो. रामकिशोरत्रिपाठी डॉ. शीतलप्रसादशुक्लश्च संसाद्याकत्वेन समागमन्।

## साहित्यविभागीया सङ्गोष्ठी

साहित्यविभागेन ०३.०२.२०१७ तः ०४.०२.२०१७ दिनाङ्कं यावत् संगोष्ठी समायोजिता। सङ्गोष्ठ्याः उद्घाटकत्वेन श्रीलालबहादुर-शास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतयः प्रो. रमेशकुमारपाण्डेयवर्याः समागुः एवं देशस्य विद्वांसः भागम् अग्रहिषुः।

## अन्ताराष्ट्रियसङ्गोष्ठी

वेदव्यासपरिसरस्य आधुनिकविभागेन ०४.०३.२०१७ तः ०५.०३.२०१७ दिनाङ्कं यावत् अन्ताराष्ट्रियसंगोष्ठी समायोजिता। देशस्य विदेशस्य च प्रसिद्धाः विद्वांसः समागुः।

## ज्योतिषविभागेन समायोजिता कार्यशाला

ज्योतिषविभागेन १७.०३.२०१७ दिनाङ्कतः २४.०३.२०१७ दिनाङ्कं यावत् राष्ट्रिया कार्यशाला समायोजिता। अस्यां कार्यशालायां प्रो. देवीप्रसादत्रिपाठ्यादिप्रमुखाः विद्वांसः समागत्याबोधयन्।

## शिक्षाशास्त्रविभागीया सङ्गोष्ठी

२५.०३.२०१७ दिनाङ्कतः २६.०३.२०१७ दिनाङ्कं यावत् शिक्षाशास्त्रविभागेन शान्तिशिक्षा संस्कृतञ्च इति विषये सङ्गोष्ठी समायोजिता। देशस्य विश्रुताः विद्वांसः भागम् अगृह्णन्।

## अन्ताराष्ट्रियमहिलादिवसः

परिसरे महिलासंस्कृताध्ययनकेन्द्रद्वारा अन्ताराष्ट्रियमहिलादिवसः ०८.०३.२०१७ दिनाङ्के समाचरितः। कार्यक्रमेऽस्मिन् मुख्यातिथिः श्रीमतिरेणुशर्मा (DSP), डॉ.जगपूर्णिमा वेद्या, श्रीमती रंजना न्यायवादिनी, श्रीमती सुरेशशर्मा प्रागपुरग्रामप्रधाना विशिष्टातिथयः च आसन्। कार्यक्रमेऽस्मिन् विभिन्नक्षेत्रेषु प्रख्यातानां महिलानां सम्माननं परिसरपक्षतः विहितम्, ताश्च श्रीमती कुसुमवालिया, श्रीमती निशा, श्रीमती उपासना, श्रीमती सुमन देवी इत्याद्यः। अस्य कार्यक्रमस्य संयोजनं महिलाध्ययनकेन्द्रस्य सहसंयोजिका डॉ. सागरिकानन्दा कृतवती।

## राष्ट्रियसेवायोजनायाः विशेषशिबिरम्

इदंप्रथमतया परिसरे समारब्धायाः राष्ट्रियसेवायोजनायाः विशेषशिबिरम् ०६.०३.२०१७ तः १२.०३.२०१७ समायोजितम्। छात्रेषु सेवाभावनायाः सामाजिकोत्तरदायित्वभावनायाः जागरणार्थं परिसरे राष्ट्रियसेवायोजनाविभागः अस्मिन् वर्षे समारब्धः। राष्ट्रियसेवायोजनायाः तत्वावधाने सम्पूर्णे वर्षे विभिन्नाः कार्यक्रमाः समनुष्ठिताः। तस्मिन्नेव क्रमे विशेषशिबिरं मार्चमासे आयोजितः। शिबिरस्य अङ्गतया स्वच्छताकार्यक्रमः, शैक्षिकसामाजिकसर्वेक्षणम्, सामाजिकचेतनाकार्यक्रमः, स्वयंसेविनां व्यक्तित्वविकासकार्यक्रमाश्च समायोजिताः। कार्यक्रमस्य संयोजनं राष्ट्रियसेवायोजनायाः संयोजकः डॉ.पी.वी.बी. सुब्रह्मण्यंवर्यः अकरोत्।

### परिसरच्छात्रैः प्राप्ता राज्यस्तरीया विजयवैजयन्ती

हिमाचलसर्वकारेण समायोजितासु राज्यस्तरीयसंस्कृतभाषणादिस्पर्धासु सर्वाधिकान् पुरस्कारान् प्राप्य परिसरस्य दलेन विजयवैजयन्ती प्राप्ता। ०१.०३.२०१७, ०२.०३.२०१७ दिनाङ्कयोः हिमाचलसर्वकारेण सुन्दरनगरे राजकीयसंस्कृतमहाविद्यालये समायोजितासु आसु स्पर्धासु परिसरस्य १३ छात्राः डॉ. वासुमोहनस्य मार्गदर्शने भागमगृह्णन्।

### वार्षिकोत्सवः

परिसरस्य वार्षिकोत्सवः २१.०३.२०१७ दिनाङ्के परिसरप्राचार्याणां प्रो. लक्ष्मीनिवासपाण्डेयवर्याणाम् आध्यक्षे सवैभवं समनुष्ठितः। कार्यक्रमेऽस्मिन् मुख्यातिथिः संस्थानस्य मुख्यालयात् समागतः डॉ. सी.गिरिः राष्ट्रियसेवायोजनायाः संस्थानस्य राष्ट्रियसंयोजकः आसीत्। विशिष्टातिथिः श्रीमतीसीमादेवी नलेटीग्रामप्रधाना आसीत्। सारस्वतातिथिः श्रीलालबहादूरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य वास्तुविभागाध्यक्षः प्रो. देवीप्रसादत्रिपाठिवर्यः आसीत्। कार्यक्रमे प्राचार्याः अतिथयश्च छात्रानुद्बोधितवन्तः। वार्षिकशैक्षिक-सांस्कृतिक-क्रीडास्पर्धासु विजेतृच्छात्राः विभिन्नराष्ट्रियराज्यस्तरीयासु शैक्षिक-सांस्कृतिक-क्रीडा-स्पर्धासु विजेतृच्छात्राश्च सभाजिताः प्राचार्यैः अतिथिभिश्च। कार्यक्रमास्यान्ते सांस्कृतिककार्यक्रमाः प्रस्तुताः छात्रैः।

## लखनऊपरिसरवार्ता

### युवदिवसः प्रज्ञापीठस्योद्घाटनं च

जनवरीमासस्य १६.०१.२०१७ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरे स्वामि-विवेकानन्दजयन्त्याः समुपलक्ष्ये युवदिवसस्य एवं परिसरीयच्छात्राणां सर्वाङ्गीणविकासाय "महापुरुषप्रज्ञापीठस्योद्घाटनं सञ्जातम्। अस्य कार्यक्रमस्यारम्भः सरस्वत्याः विवेकानन्द-महोदयस्य च प्रतिमायां माल्यार्पणेन दीपप्रज्ज्वालनेन च जातः। कार्यक्रमेऽस्मिन् मुख्यातिथिरूपेण डॉ.दयानन्दलालमहोदयः, विशिष्टातिथिः प्रो. धनीन्द्रकुमारझामहोदयः कार्यक्रमस्याध्यक्षः प्रो. सुरेन्द्रपाठकमहोदयः, कार्यक्रमस्य संचालकः डॉ. यदुवीरस्वरूपब्रह्मचारिमहोदयः च आसन्। अस्मिन् कार्यक्रमे विविधविभागानां प्राध्यापकाः, छात्राः परिसरीयसमस्तकर्मचारिणश्च समुपस्थिताः आसन्। विदुषां वैदुष्यपूर्णभाषणेन छात्रवृन्दाः कृतार्थाः जाताः।



दीपं प्रज्वलयन् परिसरप्राचार्यः

### गणतन्त्रदिवससमारोहः

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरे जनवरीमासस्य षड्विंशतिदिनाङ्के गणतन्त्रदिवससमारोहः समाचरितः। समारोहेऽस्मिन् परिसरप्राचार्याः प्रो.सुरेन्द्रपाठकमहोदयाः ध्वजोत्तोलनं कृतवन्तः। सर्वेऽपि परिसरीयप्राध्यापकाः छात्राः कर्मचारिणश्च मिलित्वा राष्ट्रगानं गीतवन्तः। ध्वजोत्तोलने सर्वेऽपि परिसरीयप्राध्यापकाः छात्राः कर्मचारिणश्च समुपस्थिताः आसन्। अवसरेऽस्मिन् परिसरीयसभाकक्षे १० वादनतः प्रतिभाप्रदर्शनकार्यक्रमोऽपि आयोजितः। यस्मिन् सर्वे छात्राः स्वकीयप्रतिभां प्रदर्शितवन्तः। कार्यक्रमेऽस्मिन् मंचसञ्चालनस्य दायित्वम् ऊढवन्तः डॉ. एस.पी.सिंहमहोदयाः।

### द्विदिवसीयाखिलभारतीयव्याकरणशास्त्रीयसङ्गोष्ठी

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरस्य व्याकरणविभागेन जनवरीमासस्य २८ दिनाङ्कतः २९ दिनाङ्कं यावत् "शब्दप्रमाणविमर्शः" इति विषयमधिकृत्य द्विदिवसीयाखिल-भारतीयव्याकरणशास्त्रीयसङ्गोष्ठी विशिष्टव्याख्यानं च आयोजितम्। अस्याः सङ्गोष्ठ्याः समुद्घाटनं सरस्वत्याः माल्यार्पणेन दीपप्रज्ज्वालनेन च सम्पन्नम्। कार्यक्रमेऽस्मिन् जयपुर-परिसरात् प्रो.शिवाकान्तझामहोदयः, श्रीधरमिश्रमहोदयः भोपालपरिसरात् डॉ. सुबोधशर्ममहोदयः एवम् उत्तराखण्डसंस्कृतविश्वविद्यालयात् डॉ. दामोदरपरगाईमहोदयश्च समागताः। द्विदिवसीयसङ्गोष्ठ्यां सत्रत्रयं प्रचलितम्, त्रिषु सत्रेषु पञ्चाशताधिकशोधपत्राणि पठितानि। चतुर्थसत्रं सम्पूर्तिसत्रमासीत् तस्मिन् सत्रे मञ्चसञ्चालनं डॉ.यदुवीरस्वरूपब्रह्मचारिमहोदयेन कृतम्। स्वागतभाषणं प्रो.भारतभूषणत्रिपाठिमहोदयेन एवं मुख्योद्बोधनं प्रो.आजादमिश्रमहोदयेन अध्यक्षीयभाषणं प्रो.सुरेन्द्रपाठकमहोदयेन च कृतम्। प्रमाणपत्राणां वितरणमपि अस्मिन्नेव सत्रे संजातम्। कार्यक्रमे धन्यवादज्ञापनं श्रीप्रमोदकुमारशुक्लेन सम्पादितम्। कार्यक्रमस्य समापनं शान्तिमन्त्रैः संजातम्।




व्याकरणसंगोष्ठ्याः एकं दृश्यम्

## सौप्रस्थानिकं एवं स्वागतकार्यक्रमः

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरे कार्यरतः अनुभागाधिकारी श्रीमान् श्रीपतिरायमहोदयः जनवरीमासस्य ३१ दिनाङ्के सेवामुक्तः संजातः। तदर्थं परिसरे तस्य सौप्रस्थानिकसमारोहः एवं नूतनतया अनुभागाधिकारी इत्यस्य कार्यभारं स्वीकृतवत्याः डॉ. उर्मिलातिवारिमहोदयायाः स्वागतमपि सार्धमेव अयोजितम्। कार्यक्रमेऽस्मिन् सर्वेऽपि परिसरीयप्राध्यापकाः कर्मचारिणश्च समुपस्थिताः आसन्।

## वेदविभागीयाखिलभारतीयसंगोष्ठी

फरवरीमासस्य ४ दिनाङ्कतः ५ दिनाङ्कं यावत् राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरस्य वेदविभागेन एका राष्ट्रिया संगोष्ठी आयोजिता। अस्यां संगोष्ठ्यां विविधस्थानेभ्यः सप्तत्यधिकशोधच्छात्राः स्वकीयशोधपत्रं प्रस्तुतवन्तः। शोधसंगोष्ठ्याः विषयः आसीत् 'वेदेषु विश्वहितचिन्तनम्' इति। अस्य कार्यक्रमस्यायोजनं वेदविभागस्य प्राध्यापकेन एवं प्रो. भारतभूषणत्रिपाठिमहोदयेन मिलित्वा कृतम्। कार्यक्रमे अन्ये आचार्याः समागताः प्रो. ब्रजेशकुमारशुक्लः, प्रो. मनोजकुमारमिश्रः, डॉ. सुनीलकात्यायनः, डॉ. वाचस्पतिनाथझा, शैलेन्द्रप्रसाद उनियालः, डॉ. प्रयागनारायणमिश्रः, डॉ. मधुसत्यदेवश्च। कार्यक्रमस्य अध्यक्षाः प्रो. सुरेन्द्रपाठकमहोदयाः आसन्। परिसरीयप्राध्यापकाः स्वकीयशोधपत्राणि अपि प्रस्तुतवन्तः। कार्यक्रमस्य समापनं शान्तिमन्त्रेण प्रमाणपत्रवितरणेन च संजातम्।

## अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे भागग्रहणम्

जनवरीमासस्य ३० दिनाङ्कतः फरवरीमासस्य २ दिनाङ्कं यावत् राष्ट्रियसंस्कृतविद्यापीठद्वारा आयोजिताखिलभारतीयसंस्कृतच्छात्र-प्रातिभसमारोहे राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरस्य छात्राः विविधेषु विषयेषु प्रतिभागं कर्तुं गतवन्तः। तेषु लोकनृत्यस्पर्धायां एकपात्राभिनये तृतीयं एवं द्वितीयस्थानं प्राप्तवन्तः। एकपात्राभिनये आचार्यकक्षायाम् अधीयानः छात्रः विनोदशर्मा लोकनृत्ये अन्येऽपि परिसरीयच्छात्राः च आसन्।



ज्योतिषसङ्गोष्ठ्यां मञ्चासीनाः अतिथयः

## ज्यौतिषविभगीयाखिलभारतीयशास्त्रीयसंगोष्ठी

फरवरीमासस्य एकादशे एवं द्वादशे दिनाङ्के ज्यौतिषविभागीयराष्ट्रियसंगोष्ठ्याः विशिष्ट-व्याख्यानस्य च आयोजनं जातम्। अस्याः संगोष्ठ्याः संयोजकः आसीत् ज्यौतिषविभागाध्यक्षः प्रो. मदनमोहनपाठकमहोदयः। कार्यक्रमे अध्यक्षपदं समलंकृतवन्तः परिसरप्राचार्याः प्रो. सुरेन्द्रपाठकमहोदयाः। कार्यक्रमे षष्ट्यधिकशोधपत्राणि पठितानि, कार्यक्रमे अन्येभ्यः परिसरेभ्यः अभ्यागताः समागताः आसन्। तेषु प्रो.रामचन्द्रझा, प्रो.उमाशंकरशुक्लः, प्रो.शिवाकान्तझा, प्रो. वासुदेवशर्मा, प्रो.सदानन्दशुक्लः, प्रो.भारतभूषणमिश्रमहोदयः, प्रो.हंसधरझा, प्रो.ईश्वरभट्टः, प्रो. रामजीवनमिश्रमहाभागश्च समुपस्थिताः आसन्। अवसरेऽस्मिन् ज्यौतिषविभागीयप्रमाणपत्रीय-पाठ्यक्रमस्य ज्यौतिषपरिचयपाठ्यक्रमस्योद्घाटनमपि संजातम्। पाठ्यक्रमोऽयं त्रैमासिको वर्तते। कार्यक्रमस्य समापनं प्रमाणपत्रवितरणं च १२ दिनाङ्के सायंकाले चतुर्वादने संजातम्। उद्घाटने समापने च मञ्चसंचालनं डॉ. ज्योतिप्रसाद-दासमहोदयेन कृतम्। धन्यवादज्ञापनं डॉ.उमेशचन्द्रपाण्डेयमहोदयेन सम्पादितम्।

## मातृभाषादिवसः

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरेण फरवरी मासस्य २१ दिनाङ्के मातृभाषादिवसमुपलक्ष्य एका "विविधशास्त्रों के अध्ययन में मातृ भाषा का योगदान" इति विषये भाषणस्पर्धा एवं स्वरचितकाव्यकण्ठपाठस्पर्धा आयोजिता। कार्यक्रमस्यायोजकौ डॉ.एस.पी.सिंह श्रीप्रमोदकुमारशुक्लौ च आस्ताम्। कार्यक्रमस्य अध्यक्षत्वं कृतवन्तः परिसरप्राचार्याः प्रो.सुरेन्द्रपाठकमहोदयाः। कार्यक्रमे छात्राः सोत्साहं भागं स्वीकृतवन्तः। कार्यक्रमेऽस्मिन् सर्वेऽपि विभागीयप्राध्यापकाः छात्राश्च समुपस्थिताः आसन्। कार्यक्रमस्य समापनं मातृवन्दनया जातम्।

## शिक्षाशास्त्रविभागीयाखिलभारतीयसंगोष्ठी

फरवरीमासस्य २५ दिनाङ्कतः २६ दिनाङ्कं यावत् लखनऊपरिसरस्थशिक्षाशास्त्रविभागेन "समावेशिशिक्षा" इति विषयमधि-कृत्याह्निकद्वयात्मिकायाः राष्ट्रियसंगोष्ठ्याः समायोजनं कृतम्। कार्यक्रमस्य प्रारम्भः सरस्वत्याः अर्चनया अभ्यागतानां स्वागतेन जातः। अस्यां संगोष्ठ्याम् अन्येभ्यः राज्येभ्यः अभ्यागताः आहूताः आसन् तद्यथा वेदव्यासपरिसरात् प्रो.लक्ष्मीनिवासपाण्डेयमहोदयः, देहलीमुख्यालयात् डॉ. कुलदीपशर्ममहोदयः, प्रो. रामसागरमिश्रमहोदयः, राजस्थानात् डॉ. माताप्रसादशर्ममहोदयः, डॉ. वन्दना अरोड़ामहोदया च, एवं डॉ. जयकृष्णन्-महोदयः, समागताः आसन्। कार्यक्रमस्य संयोजकौ प्रो. लोकमान्यमिश्रमहोदयः प्रो.देवीप्रसादद्विवेदिमहोदयः च आस्ताम्। अन्ये

परिसरवार्ता

विभागीयप्राध्यापकाः कार्यक्रमेऽस्मिन् पूर्णनिष्ठया स्वकीयसहयोगं प्रदत्तवन्तः। कार्यक्रमे षष्ट्यधिकशोधपत्राणि पठितानि। मञ्चसंचालनं प्रो. देवीप्रसादद्विवेदिमहोदयः, स्वागतभाषणं च प्रो.लोकमान्यमिश्रमहोदयश्च कृतवन्तौ। कार्यक्रमस्य समापनं शान्तिमन्त्रेण संजातम्।



शिक्षाशास्त्रसङ्गोष्ठ्याः एकं दृश्यम्

### बौद्धदर्शनविभागीया राष्ट्रिया संगोष्ठी

मार्चमासस्य तृतीये चतुर्थे च दिनाङ्के लखनऊपरिसरे बौद्धदर्शनविभागेन बौद्धन्याय-परम्परायाः विविधायामाः इति विषये द्विदिवसीयायाः राष्ट्रियसंगोष्ठ्याः डॉ. भीमरावअम्बेडकर-व्याख्यानस्य च आयोजनं कृतम्। अस्यां संगोष्ठ्यां मुख्याभ्यागताः प्रो.संघसेनसिंहः, प्रो.एच.वी. गंगनेगी-भिक्षुः, रमेशचन्द्रनेगी इत्यादयश्च आसन्। कार्यक्रमस्य संचालनं डॉ. गुरुचरणसिंहनेगिमहोदयेन धन्यवादज्ञापनं च प्रो. विजयकुमारजैनमहोदयेन कृतम्। अस्मिन्कार्यक्रमे पञ्चाशताधिकशोधपत्राणि पठितानि। कार्यक्रमे सर्वेऽपि विभागीयप्राध्यापकाः अभ्यागताः विभागीयकार्यकर्तारः समुपस्थिताः आसन्। अस्याः संगोष्ठ्याः संयोजनं कृतवान् विभागीयप्राध्यापकः डॉ.गुरुचरणसिंहनेगिमहोदयः।

### आधुनिकविभागीयराष्ट्रिया संगोष्ठी

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरस्थाधुनिकविभागेन मार्चमासस्य षष्ठदिनाङ्कतः सप्तमदिनाङ्कं यावत् प्रचाल्यमानायाः द्वह्वात्मिकायाः राष्ट्रियसंगोष्ठ्याः विशिष्टव्याख्यानस्य च संयोजनं कृतम्। अस्याः संगोष्ठ्याः समुद्घाटनं षष्ठे दिनाङ्के प्रातः काले ११ वादने मातुः सरस्वत्याः अर्चनया माल्यार्पणेन च जातम्। कार्यक्रमे अभ्यागताः प्रो. सुरेन्द्रप्रतापसिंहमहोदयः, प्रो.सुरेन्द्रपाठकमहोदयः परिसरप्राचार्यः, डॉ. अरुणकुमारमिश्रः प्रो.सुरेन्द्रझा, इत्यादयश्च। कार्यक्रमस्य संचालनं डॉ. कविताबिसारिया, मङ्गलाचरणं डॉ. जगन्नाथझा, धन्यवादज्ञापनं डॉ.एस.पी. सिंहमहोदयश्च कृतवन्तः। कार्यक्रमे स्वागतगीतं परिसरीयच्छात्रैः विहितम्। अभ्यागतानां स्वागतभाषणं कृतवन्तः संकायाध्यक्षाः प्रो. शिशिरकुमारपाण्डेयमहोदयाः। कार्यक्रमे अशीत्यधिकशोधपत्राणि पठितानि। कार्यक्रमस्य समापने सप्तमे दिनाङ्के मुख्यातिथिरूपेण समागताः श्रीगोपबन्धुपटनायकमहोदयः (अध्यक्षः, वेतनसमितिः, उ.प्र.), अध्यक्षः प्रो.सुरेन्द्रपाठकमहोदयाः च आसन्। कार्यक्रमस्य समापनं शान्तिमन्त्रेण संजातम्।

### अन्ताराष्ट्रियमहिलादिवसः

मार्चमासस्य अष्टमे दिनाङ्के लखनऊपरिसरे अन्ताराष्ट्रियमहिलादिवसस्य आयोजनं जातम्। कार्यक्रमस्य समुद्घाटनं सरस्वत्याः अर्चनया माल्यार्पणेन च संजातम्। कार्यक्रमे मुख्यातिथिरूपेण उपस्थिताः आसन् श्री अमरेन्द्रनाथत्रिपाठिमहोदयाः, एवं श्रीमतीवत्सलासिंहमहोदया च। कार्यक्रमस्य अध्यक्षः परिसरप्राचार्यः प्रो.सुरेन्द्रपाठकमहोदयः आसीत्। कार्यक्रमे परिसरीयमहिलाप्राध्यापिकानां बालिकानां च सम्मानं संजातम्। प्रो.अवनीश अग्रवालमहोदया कार्यक्रमस्य संचालिका आसीत्। कार्यक्रमेऽस्मिन् परिसरीयसर्वेऽपि विभागीयप्राध्यापकाः छात्राः कर्मचारिणश्च समुपस्थिताः आसन्। कार्यक्रमस्य समापनं शान्तिमन्त्रेण संजातम्।

### साहित्यविभागीयाखिलभारतीयसंगोष्ठी

मार्चमासस्य तृतीये चतुर्थे च दिनाङ्के लखनऊपरिसरे "साहित्यशास्त्रेऽभिनवगुप्तपरम्परा" इति विषये द्विदिवसीयायाः राष्ट्रियसंगोष्ठ्याः विशिष्टव्याख्यानस्य च आयोजनं कृतम्। अस्यां संगोष्ठ्यां मुख्याभ्यागताः प्रो. कमलेशझा-डॉ. सदाकान्त-प्रो. छोटेलालत्रिपाठि प्रो. रामसुमेरयादवमहोदयाश्च आसन्। कार्यक्रमस्य संचालनं प्रो.भारतभूषणत्रिपाठिमहोदयेन धन्यवादज्ञापनं च प्रो.रामलखनपाण्डेयमहोदयेन कृतम्। कार्यक्रमस्याध्यक्ष्यं कृतवान् परिसरीयप्राचार्यः प्रो.सुरेन्द्रपाठकमहोदयः। अस्मिन्कार्यक्रमे पञ्चाशताधिकशोधपत्राणि पठितानि। कार्यक्रमे सर्वेऽपि विभागीयप्राध्यापकाः अभ्यागताः विभागीयकार्यकर्तारः समुपस्थिताः आसन्। अस्याः संगोष्ठ्याः संयोजनं कृतवान् विभागीयप्राध्यपकः डॉ. पवनकुमारदीक्षितमहोदयः।

### पं. गोपीनाथकविराजविशिष्टव्याख्यानम्

मार्चमासस्य २१ दिनाङ्के एकस्य विशिष्टव्याख्यानस्य आयोजनं कृतम्। कार्यक्रमस्यारम्भः सरस्वत्याः अर्चनया संजातः। अत्र मुख्यवक्तृरूपेण समुपस्थितः प्रो.राधावल्लभत्रिपाठिवर्यः (पूर्वकुलपतिः,रा.सं.संस्थानस्य)। कार्यक्रमस्य संचालनं डॉ.गुरुचरणसिंहनेगिमहोदयः स्वागतभाषणं च परिसरप्राचार्याः प्रो.सुरेन्द्रपाठकमहोदयाः कृतवन्तः। अवसरेऽस्मिन् परिसरीयसर्वेऽपि प्राध्यापकाः छात्राश्च समुपस्थिताः

आसन्। व्याख्यानस्य विषयः आसीत् "संस्कृतसाहित्यस्येतिहासः"। विषयोपस्थापनं साहित्यविभागाध्यक्षः प्रो.रामलखनपाण्डेयमहोदयः कृतवान्। कार्यक्रमस्य समापनं शान्तिमन्त्रेण संजातम्।

### लखनऊपरिसरीयवार्षिकोत्सवः

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरेण २०१६-१७ तमवर्षस्य वार्षिकोत्सवः समायोजितः। अस्मिन् वार्षिकोत्सवे मुख्यातिथिरूपेण ब्रह्मानन्दसरस्वतीमहाराजः समुपस्थितः। कार्यक्रमे सारस्वतातिथिः प्राचार्यचरः प्रो.आजादमिश्रमहोदयः आसीत्। कार्यक्रमे वार्षिकप्रतिवेदनं प्रस्तुतवन्तः शिक्षाशास्त्रविभागाध्यक्षाः प्रो.लोकमान्यमिश्रमहोदयाः। कार्यक्रमे अध्यक्षपदं समलङ्कृतवन्तः परिसरप्राचार्याः प्रो. सुरेन्द्रपाठकमहोदयाः। कार्यक्रमस्य संचालनं व्याकरणविभागाध्यक्षाः प्रो.भारतभूषणत्रिपाठिमहोदयाः कृतवन्तः। अवसरेऽस्मिन् परिसरे आवर्षं जायमानासु स्पर्धासु प्रतिभागं स्वीकृतवद्भ्यः पुरस्काराः अपि प्रदत्ताः। कार्यक्रमे धन्यवादज्ञापनं कृतवन्तः ज्योतिषविभागाध्यक्षाः प्रो. मदनमोहनपाठकमहोदयाः। कार्यक्रमे परिसरे प्रकाश्यमानायाः गोमतीपत्रिकायाः विमोचनमपि संजातम्।

## श्रीसदाशिवपरिसरवार्ता

### ग्लोरिफेष्टमहोत्सवः

९-१३ जनवरीमासे २०१७ पर्यन्तं समनुष्ठिते ग्लोरिफेष्टमहोत्सवे परिसरस्य पञ्चदशच्छात्राः भागग्रहणमकुर्वन्। तेषु सुधाराणिभुयाँ-लक्ष्मणपाढी-अमितभोई-सिद्धार्थस्वाइँ-जगदीशनस्कराः नाटके अभिनीय प्रथमस्थानमध्यकार्षुः। यथाक्रमं शस्त्रीयनृत्यपरिवेषणे दीप्तेशशतपथिः प्रथमस्थानम्, आंग्लभाषणे देवकीमिश्रा प्रथमस्थानम्, एकपात्राभिनये लक्ष्मणपाढी द्वितीयस्थानं, यन्त्रवादने देवकीमिश्रा तृतीयस्थानम्, ओडिआभाषणे सुधाराणिभुयाँ तृतीयस्थानम्, उपस्थापकान्वेषणे सुधाराणिभुयाँ तृतीयस्थानं च सम्प्राप्य परिसरस्य गौरवं समवर्धयन्। अस्मिन्कार्येक्रमे श्रीविश्वनाथमिश्रश्रीआदित्यनारायणदाशमहाभागौ छात्राणां मार्गदर्शकौ आस्ताम्।

### अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः

३० जनवरी २०१७ तः ०३ फरवरी २०१७ पर्यन्तं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठेन समायोजिते एकादशाऽखिलभारतीय-संस्कृतच्छात्रप्रातिभसमारोहे डॉ. उमेशचन्द्रमिश्रमहाभागानां, डॉ. कृष्णचन्द्रकविमहोदयानां मार्गदर्शनेन परिसरस्यास्य ११ छात्राः विविध-प्रतियोगितासु सोत्साहं भागं गृहीतवन्तः। तेषु धर्मशास्त्रभाषणप्रतियोगितायाम् इतुस्मिताविधारः रौप्यपदकं सम्प्राप्य परिसरस्य मानमवर्धयत्।

### नाट्यमहोत्सवे भागग्रहणम्

नवदेहलीस्थे राष्ट्रियसंस्कृतसंस्थाने समनुष्ठिते वसन्तमहोत्सवे परिसरस्य चतुर्विंशतिच्छात्राः आचार्य ओगेटिपरीक्षितशर्मणा विरचितं रक्षाबन्धनम् इति नाटकं प्रास्तुवन्। नाटकस्यास्य निर्देशनं साहित्यविभागस्याध्यापकः डॉ. सुशान्तकुमारराजः, ज्यौतिषविभागस्याध्यापिका डॉ. विजयलक्ष्मीमहापात्रमहाभागा चाकुरुताम्।

### वित्तीयसाक्षारताभियानकार्यक्रमः

संस्थानस्य निर्देशेन परिसरे १२ दिसम्बर २०१६ तः १२ जनवरी २०१७ पर्यन्तं वित्तीयसाक्षरताभियानकार्यक्रमः छात्रेषु विमुद्रीकरणप्रसङ्गे जागरुकताभावोत्पन्नाय समायोजितः। प्राचार्यमहोदयानामनुमत्या पञ्चजनात्मिका एका समितिः परिकल्पिता। कार्यक्रमेऽस्मिन् समितिसंयोजकानां शिक्षाशास्त्रविभागीयवरिष्ठप्राध्यापकानां डॉ. वृन्दावनपात्रमहोदयानां मार्गदर्शनेन १३ दिसम्बर २०१६ तमे दिनाङ्के सभेयं समुद्घाटिता। यत्र परिसरप्राचार्याः प्रो. अतुलकुमारनन्दमहाशयाः अध्यक्षाः इतिहासविभागस्य प्राध्यापकाः श्रीदुर्गादासमहापात्रमहोदयाः मुख्यवक्तारश्चासन्। सन्दर्भेऽस्मिन् विमुद्रीकरणविषये अधिकं सन्देशं प्रदातुं भुवनेश्वरमण्डलस्य इलाहाबादवित्ताधिकारिणः श्रीनितीशकुमारसिंहमहोदयाः पुरीशाखोपप्रबन्धकाः श्रीराजीवलोचनपात्रमहोदयाश्चोपस्थिताः। कार्यक्रमस्यास्य सफलीकरणाय परिसरस्याध्यापकाः, छात्राः कर्मचारिणश्च भागं स्व्यकुर्वन्। एतदर्थं एकं जागृतिधर्मिलघुनाटकं परिसरीयच्छात्रैः प्रदर्शितम्।

### स्वामिविवेकानन्दजयन्ती

स्वामिविवेकानन्दस्य १५५तमीं जन्मजयन्तीमुपलक्ष्य दशमे दिनाङ्के परिसरेऽस्मिन् आयोजिते द्विदिवसीयकार्यक्रमे परिसरस्य सर्वे अध्यापकाः समुपस्थाय कार्यक्रममम् सफलीकृतवन्तः। तत्र डॉ. स्नेहलतामिश्र-डॉ. ओमनारायणमिश्रमहोदययोः मार्गदर्शनेन निबन्धलेखन-वादविवाद-आशुभाषण- चित्राङ्कन-सिद्धभाषणादिस्पर्धासु परिसरीयच्छात्रैः भागमूढ्वा पुरस्कृताः जाताः।

परिसरवार्ता

### गणतन्त्रदिवससमारोहः

२६.०१.२०१७ दिनाङ्के परिसरे गणतन्त्रदिवससमारोहः महता उत्साहेन परिपालितः। अस्मिन्नवसरे विविधाः कार्यक्रमाः, शोभायात्रा, मिनि माराथन्, स्वतन्त्रतासेनानिनः माल्यार्पणम्, ध्वजोत्तलनम्, अध्यापककर्मचारीणां क्रीडाप्रतियोगिताः, सांस्कृतिककार्यक्रमाः समायोजिताः।

### स्वच्छभारतकार्यक्रमः

संस्थानस्य निर्देशानुसारं परिसरेऽस्मिन् परिसरप्राचार्याणां प्रो. अतुलकुमारनन्दमहोदयानाम् आध्यक्षे अध्यापकानां, कर्मचारिणां छात्राणां च सहयोगेन स्वच्छभारतकार्यक्रमः परिपालितोऽभूत्। तत्र परिसरपरिवारः परिसरस्य स्वच्छतारक्षणाय सङ्कल्पं कृतवान्।

### शताब्दीमहोत्सवपरिपालनाय पूर्वप्रस्तुतिकार्यक्रमः

श्रीसदाशिवपरिसरस्य शताब्दीमहोत्सवपरिपालनार्थं पूर्वप्रस्तुतिकार्यक्रमः प्राचार्याणां प्रो. अतुलकुमारनन्दमहोदयानाम् आध्यक्षे परिसरस्य प्राक्तनच्छात्राणां सहयोगेन च ०८.०१.२०१७ तमे दिनाङ्के परिसरस्य सभागृहे एका साधारणसभा आहूता आसीत्। तस्यां सभायां शताधिकाः भारते सुप्रतिष्ठिताः प्राक्तनच्छात्राः भागं गृहीतवन्तः। तत्र २०१७ संवत्सरस्य जूनमासे अयं कार्यक्रमः प्रायः परिपालयिष्यति इति निर्णयो जातः।

### मातृभाषादिवससमारोहः

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयद्वारा अनुमोदितं जातिसंघद्वारा स्थिरीकृतं मातृभाषादिवसपालनं नवदेहलीस्थराष्ट्रिय-संस्कृतसंस्थानस्य निर्देशपत्रानुसारेण श्रीसदाशिवपरिसरेण २१ फरवरी २०१७ दिनाङ्के महतोत्साहेन पालितम्। समारोहेऽस्मिन् ओडिशा-साहित्यएकाडम्याः सभापतयः प्रो. हरिहरमिश्रमहोदयाः मुख्यातिथयः, डॉ. श्रीनिवासाचार्यमहोदयाः सम्मानितातिथयः, अवसरप्राप्त-प्राशासनिकाधिकारिणः श्रीवैकुण्ठनाथपतिमहाभागाः विशिष्टातिथियः, ओडिआभाषाप्रतिष्ठानस्य प्राक्तननिदेशकाः डॉ. कैलासचन्द्रटीकाय-तरायमहोदयाः मुख्यवक्तारश्चासन्। कार्यक्रमे परिसरस्य इतिहासविभागाध्यापकाः श्रीदुर्गाप्रासाददासमहापात्रमहोदयाः धन्यवादमयच्छन्। अपि च ओडिआविभागाध्यापिकाः डॉ. स्वागतिकामहान्तिमहोदयाः सभासञ्चालनमकुर्वन्। तत्र आधुनिकविभागस्य ओडिआप्राध्यापकानां डॉ. नृसिंहचरणसाहुमहोदयानां मार्गदर्शने संयोजनेन च प्रबन्ध-भाषण-तर्कवितर्क-संगीत-चित्राङ्कनादिविषयेषु प्रतियोगिताः समायोजिताः। विजयिच्छात्राणां कृते पुरस्कारराशिः प्रमाणपत्रञ्च परिसरपक्षतः वितरणमभूत्।

### परिसरीयशैक्षिकस्पर्धाः

प्रतिवर्षमिव अस्मिन् परिसरे वार्षिकोत्सवार्थं डॉ. गणपतिशुक्लमहोदयानां संयोजकत्वे, डॉ. कुञ्जविहारिद्विवेदिमहोदयानां, डॉ. प्रियरञ्जनरथमहोदयानां, डॉ. नन्दिघोषमहापात्रमहोदयानाञ्च सहसंयोजकत्वे स्पर्धाः समनुष्ठिताः। अनुष्ठितासु विभिन्नासु शास्त्रीयस्पर्धासु अनेकच्छात्राः सोत्साहं भागमगृह्णन् विजेतारश्च अभवन्। तत्र वरिष्ठवर्गे सर्वश्रेष्ठप्रतिभागिरूपेण शिक्षाशास्त्रविभागस्य अविनाशभोई विजेता, कनिष्ठवर्गे कालीप्रसादाचार्यः रामनारायणद्विवेदी च सर्वश्रेष्ठप्रतिभागिनौ आस्ताम्।

### महात्मागान्धिचिताभस्मस्मृतिसभा

१२ फरवरी २०१७ दिनाङ्के महात्मागान्धिचिताभस्मस्मृतिपरिषदानुकूल्येन पुरीनगरे सद्भावनागृहे महात्मागान्धिचिताभस्मस्मृतिसभा आयोजिता। कार्यक्रमेऽस्मिन् विशिष्टगान्धिवादिस्वाधीनतासंग्रामिवयोज्येष्ठाः श्रीचन्द्रशेखरनायकमहाभागाः सभापतिरूपेण, श्रीसदाशिव-परिसरस्य प्राचार्याः प्रो.अतुलकुमारनन्दमहोदयाः मुख्यातिथिरूपेण, पुरीस्थस्य सामन्तचन्द्रशेखरस्वयंशासितमहाविद्यालयस्य अवसरप्राप्ताः प्राचार्याः डॉ.हरिहरमिश्रमहोदयाः मुख्यवक्तृरूपेण च आसन्। अतिथयो महात्मागान्धिनः जीवनविषये आलोकपातं कृतवन्तः। एतस्मिन्नवसरे भाषणस्पर्धा अभवत्। तत्र परिसरस्य देवाशिषपाणिग्राही-इतुस्मिताविधार-सुप्रियाजेना इत्येते छात्राः स्पर्धासु पुरस्कारं प्राप्तवन्तः। तदानीं सर्वोदयमेलाऽपि समनुष्ठिता।

### नव्यव्याकरणविभागीयकार्यक्रमाः

पुरीस्थस्य श्रीजगनाथसंस्कृतविश्वविद्यालयस्य कुलपतिचराः प्रो. किशोरचन्द्रपाढिमहोदयाः समासवृत्तिविमर्शः इति विषयमधिकृत्य ०७.०२.२०१७ दिनाङ्के विशिष्टं व्याख्यानं प्रादुः। ०८.०२.२०१७ तः ०९.०२.२०१७ दिनाङ्कपर्यन्तं संस्थानस्यानुमोदनेन समासविमर्शः इत्यमुं विषयमाश्रित्य दिनद्वयात्मिका राष्ट्रियसङ्गोष्ठी समायोजि। उद्घाटनोत्सवे सङ्गोष्ठीसमुद्घाटकत्वेन परिसरप्राचार्याः प्रो. अतुलकुमारनन्दमहाभागाः, मुख्यातिथिरूपेण श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिचराः प्रो. किशोरचन्द्रपाढिमहोदयाः, नवदेहलीस्थश्रीलालबहादुरराष्ट्रियसंस्कृत-विद्यापीठस्य व्याकरणविभागस्याचार्याः प्रो. जयकान्तसिंहशर्ममहाभागाः, सभाध्यक्षरूपेण विभागमुख्याः प्रो. हरेकृष्णमहापात्रमहानुभावाः समुपस्थिताश्च आसन्। कार्यक्रमस्य प्रारम्भे विभागस्य वरिष्ठाः आचार्याः वैदिकमङ्गलाचरणं व्यधासिषुः। डॉ. दुर्गाचरणषडङ्गिनां निदेशकत्वे डॉ.

उमेशचन्द्रमिश्रमहोदयानां संयोजकत्वे, प्रो. अनुपमापृष्टिमहोदयानां तत्त्वावधानेन तथा डॉ. अजयकुमादाश-श्रीअजयानन्दसाहुमहोदयानां सञ्चालनेन च सङ्गोष्ठी पूर्णतां प्राप्नोत्। कार्यक्रमेऽस्मिन् बहुदूरात् राज्यात् राज्यान्तराच्च नैके विद्वांसः समुपागत्य अधिसमासविमर्शं विविधान् शोधप्रबन्धानुपस्थापितवन्तः।

उद्यापनसत्रे परिसरप्राचार्याः प्रो. अतुलकुमारनन्दमहाभागानां सभाध्यक्ष्यरूपेण, राष्ट्रियसंस्कृतसंस्थानस्य, नवदेहलीस्थपरीक्षानियन्त्रकाणां प्रो. सुकान्तकुमारसेनापतिमहोदयानां मुख्यातिथिरूपेण, श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य स्नातकोत्तरव्याकरणविभागस्य आचार्याणां प्रो. गोविन्दचन्द्रकरमहोदयानां मुख्यवक्तृरूपेण, तस्यैव श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य स्नातकोत्तरव्याकरणविभागस्य आचार्याणां प्रो. हरिहरहोतृमहोदयानां विशिष्टातिथिरूपेण, ओडिशाराज्यस्य जगतसिंहपुरमण्डलस्य सम्प्राप्तराष्ट्रपतिसम्मानानां पण्डितगोविन्दचन्द्रमिश्र-महोदयानां सम्मानितातिथिरूपेण, विभागस्य वरिष्ठाचार्याणां प्रो. के.वी.सोमयाजुलुमहाभागानां स्वागतेन, विभागस्यान्यतमाचार्याणां डॉ. दुर्गाचरणषडङ्गिनां सङ्गोष्ठीसारकथनेन निदेशनेन, विभागस्य मुख्यानां प्रो. हरेकृष्णमहापात्रमहाभागानां विभागाध्यक्षभाषणेन, विभागस्य सहायकाचार्याणां डॉ. उमेशचन्द्रमिश्रमहाभागानां सञ्चालनेन विभागीयकनिष्ठाचार्याणां श्रीअजयानन्दसाहुमहोदयानां धन्यवादप्रदानेन च समासविमर्शः इति सङ्गोष्ठी सफलतामगात्। विभागीयाचार्यणां प्रो. अनुपमापृष्टिमहोदयानां तत्त्वावधाने सर्वं कार्यं सम्पन्नमभवत्।

## साहित्यविभागीयकार्यक्रमाः

विशिष्टव्याख्यानमाला १९ फरवरी २०१७ तमे दिनाङ्के समायोजिता। तत्र शृङ्गेरिस्थस्य राजीवगान्धीपरिसरसस्य प्राचार्यचराः प्रो. किशोरनाथझामहोदयाः संस्कृतसाहित्ये व्याख्यापद्धतिः इति विषयमवलम्ब्य विशिष्टव्याख्यानमयच्छन्। पुनः विभागपक्षतः द्विदिवसीय-जातीयालोचनाचक्रं १९ तः २० फरवरी २०१७ दिनाङ्कपर्यन्तम् आधुनिकसंस्कृतकाव्येषु राष्ट्रियभावना इति विषये अभवत्। तत्र श्रीसदाशिवपरिसरस्य प्राचार्यचराः डॉ. विन्ध्येश्वरीप्रसादहिमांशुमहोदयाः मुख्यातिथयः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिचराः प्रो. नीलकण्ठपतिमहाभागाः मुख्यवक्तारः, परिसरस्यास्य प्राचार्याः प्रो.अतुलकुमारनन्दमहोदयाः आध्यक्षतां निरवहन्तः राष्ट्रियसङ्गोष्ठ्याः समुद्घाटनमकुर्वन्। आलोचनाचक्रस्य उद्यापनसत्रे परिसरस्यास्य प्राचार्याः प्रो. अतुलकुमारनन्दमहोदयाः मुख्यातिथयः, राष्ट्रियसंस्कृत-विद्यापीठस्य आचार्याः प्रो. सत्यनारायणाचार्यमहोदयाः मुख्यवक्तारः, शृङ्गगिरिस्थस्य राजीवगान्धीपरिसरस्य प्राचार्यचराः प्रो. किशोरनाथझा-महोदयाः सम्मानितातिथयः, परिसरस्य व्याकरणविभागमुख्याः प्रो. के.वी.सोमयाजुलुमहोदयाः विशिष्टातिथयः, परिसरस्यास्याध्यापकचराः डॉ. श्रीनिवासाचार्यमहोदयाः निमन्त्रितातिथयः, साहित्यविभागाध्यक्षाः प्रो. सूर्यमणिरथमहोदयाः आध्यक्ष्यरूपेण समुपस्थाय सङ्गोष्ठीमिमां सफलीकृतवन्तः। अस्यां सङ्गोष्ठ्यां विभिन्नप्रान्तेभ्यः सप्ततिः शोधपत्रपाठकाः शोधपत्राणि उपस्थापयन्। एतस्मिन् कार्यक्रमे सर्वे विभागीयाचार्याः छात्राश्च उपस्थिताः। डॉ.वसन्तकुमारमुद्रामहोदयानां सङ्गोष्ठीसंयोजकत्वे कार्यं पूर्णतां प्राप्नोत्।

## पुराणेतिहासविभागीयकार्यक्रमाः

फरवरिमासि २२-२३ दिनाङ्कयोः साम्प्रतिकसमाजं प्रति रामायणस्यावदानम् इति विषयमधिकृत्य द्विदिवसीयराष्ट्रियचर्चासत्रमायोजितम्। समारोहेऽस्मिन् विभागीयप्रकाशनं पुराणसौरभम् उन्मोचितमभवत्। २३.०२.२०१७ दिनाङ्के पूर्वाह्णे विभागपक्षतः विष्णुसहस्रनामस्तोत्रे अवतारवादविमर्शः इति शीर्षकमवलम्ब्य विशिष्टव्याख्यानमायोजितम्।

## धर्मशास्त्रविभागीयकार्यक्रमाः

२७.०१.२०१७ दिनाङ्कतः २८.०१.२०१७ यावत् द्विदिवसीया राष्ट्रियसंगोष्ठी आयोजिता। अस्यां संगोष्ठ्यां परिसरप्राचार्यैः प्रो. अतुलकुमारनन्दमहोदयैः आध्यक्षम् अलंकृतम्। संगोष्ठ्यामस्यां प्रो. ललितकुमारसाहुमहोदयाः संयोजकत्वेन, आचार्यचराः किशोरचन्द्र-महापात्रमहोदयाः, आचार्याः देवीपदरथमहोदयाः, डॉ. सोमनाथदाशमहोदयाः, नृसिंहनाथगुरुमहोदयाः, उत्कलप्रदेशस्य श्रीजगन्नाथसंस्कृतविश्वविद्यालयात् प्रो. माधवचन्द्रपण्डॉमहोदयाः तथा श्रीजगन्नाथवेदकर्मकाण्डमहाविद्यालयात् प्रो. विश्वनाथसवाईंमहोदयाः उपस्थिता आसन्। परिसरस्यापि साहित्यविभागस्य आचार्याः सूर्यमणिरथमहाभागाः, व्याकरणविभागस्य आचार्याः हरेकृष्णमहापात्रमहाभागाः, डॉ. दुर्गाचरणषडङ्गिमहाभागाः, इतिहासविभागस्य आचार्याः दुर्गाचरणदासमहापात्रमहाभागाः, पुराणविभागस्य डॉ. मखलेशकुमारमहाभागाः च उपस्थिता आसन्। जनवरिमासस्य एकोनत्रिंशद्दिनाङ्के विभागेन 'राष्ट्रपतिसम्मानितपण्डितकुलमणिमिश्रस्मृतिव्याख्यानमाला' आयोजिता, यत्र विषयः 'दत्तपुत्रविमर्शः' आसीत्। मुख्यवक्तारः आचार्यचराः किशोरचन्द्रमहापात्रमहोदयाः आसन्।

## सर्वदर्शनविभागीयकार्यक्रमाः

दिनाङ्कतः १०.०२.२०१७-११.०२.२०१७ यावत् श्रीमद्भगवद्गीतायाः वैज्ञानिकत्वमित्यमुं विषयमाश्रित्य दिनद्वयात्मिका राष्ट्रियसङ्गोष्ठी समायोजिता। उद्घाटनोत्सवे सङ्गोष्ठीसमुद्घाटकत्वेन श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिचराः प्रो. नीलकण्ठपतिमहाभागाः,

मुख्यातिथिरूपेण राष्ट्रियसंस्कृतसंस्थानस्य नवदेहलीस्थस्य परीक्षानियन्त्रकाः प्रो. सुकान्तकुमारसेनापतिमहोदयाः, मुख्यवक्तृरूपेण परिसरस्य नव्यव्याकरणविभागाध्यक्षाः प्रो. हरेकृष्णमहापात्रमहाभागाः, विशिष्टवक्तृरूपेण राष्ट्रपतिसम्मानेन सम्मानिताः पण्डितगोविन्दचन्द्रमिश्रमहाभागाः, सभाध्यक्षरूपेण परिसरस्य प्राचार्याः प्रो. अतुलकुमारनन्दमहाभागाः समुपस्थिताः आसन्। कार्यक्रमस्यास्य प्रारम्भे विभागीयच्छात्रः श्रीकृष्णकान्तमिश्रः वैदिकमङ्गलमाचरत्। डॉ. नन्दिघोषमहापात्रमहोदयानां निदेशकत्वे, डॉ. प्रदीपकुमारसाहुमहोदयानां संयोजकत्वे, प्रो. दाशगौरप्रियामहोदयानां तत्त्वावधाने, डॉ. नन्दिघोषमहापात्रमहोदयानां सञ्चालने च सङ्गोष्ठी पूर्णता समधिगता। अनन्तरं दिनद्वये शोधपत्रवाचनात्मकं सत्रदशकं समनुष्ठितम्। एषु भारतस्य विविधप्रान्तेभ्यः समागताः उपविंशतिः मनीषिणः शोधपत्राणि प्रास्तुवन्। किञ्च परिसरस्याचार्यं, शोधच्छात्रान् स्नातकस्नातकोत्तरच्छात्राश्चाहत्य प्रायः उपनवति शोधपत्राणि सम्पठितानि। श्रीमद्भगवद्गीतायाः वैज्ञानिकतांश्चाधिकृत्य विविधबिन्दूनामुपरि आलोकपातः व्यधायि।

समापनसत्रे परिसरप्राचार्याणां प्रो. अतुलकुमारनन्दमहाभागानां सभाध्यक्षरूपेण, श्रीसदाशिवपरिसरस्य प्राचार्यचराणां प्रो. सी.एच्.एन्.बी. प्रसादरावमहोदयानां मुख्यातिथिरूपेण, श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलसचिवचराणां प्रो. प्यारीमोहनपट्टनायकमहोदयानां मुख्यवक्तृरूपेण, श्रीसदाशिवपरिसरस्य हिन्दीविभागास्याध्यापकचराणां डॉ. श्रीनिवासआचार्यमहोदयानां चास्यैव परिसरस्य साहित्य-विभागाध्यक्षाणां प्रो. सूर्यमणिरथमहोदयानां सम्मानितातिथिरूपेण, विभागीयाध्यापकानां डॉ. नन्दिघोषमहापात्रमहाभागानां स्वागतेन, विभागाध्यक्षाणां प्रो. दाशगौरप्रियामहाभागानां सङ्गोष्ठीप्रतिवेदनकथनेन, परिसरस्यास्य प्राचार्याणां प्रो. अतुलकुमारनन्दमहाभागानाम् अध्यक्ष-भाषणेन, विभागीयाध्यापकानां श्रीअजयकुमारपाण्डेयमहोदयानां सभासञ्चालनेन विभागीयाध्यापकानां डॉ. प्रदीपकुमारसाहुमहोदयानां धन्यवादप्रदानेन च श्रीमद्भगवद्गीतायाः वैज्ञानिकत्वम् इति सङ्गोष्ठी सफलतामगमत्। विभागाध्यक्षाणां प्रो.दाशगौरप्रियामहाभागानां तत्त्वावधानेन सर्वं कार्यमिदं सम्पन्नं सञ्जातम्।

### अद्वैतवेदान्तविभागीयकार्यक्रमाः

०९.०२.२०१७ दिनाङ्कतः १०.०२.२०१७ यावत् प्रस्थानत्रयस्य समाजोपयोगिता इति विषयमधिकृत्य राष्ट्रियसङ्गोष्ठी समायोजिता आसीत्। तत्रोद्घाटनोत्सवे श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलसचिवचराः प्रो. प्यारीमोहनपट्टनायकमहोदयाः मुख्यातिथयः, तस्यैव विश्वविद्यालयस्य नव्यन्यायविभागमुख्याः प्रो.कमलेशमिश्रमहोदयाः मुख्यवक्तारः, परिसरस्यास्य साहित्यविभागमुख्याः प्रो.सूर्यमणिरथमहोदयाः सम्मानितातिथयः, परिसरप्राचार्याः आध्यक्ष्यरूपेणोपस्थाय सङ्गोष्ठ्याः उद्घाटनमकुर्वन्। उद्यापनसत्रे प्राचार्यचराः प्रो. प्रसादरावमहाभागाः, मुख्यातिथयः, संस्थानस्य परीक्षानियन्त्रकाः प्रो. सुकान्तकुमारसेनापतिमहोदयाः मुख्यवक्तारः, श्रीजगन्नाथसंस्कृतविद्यालयस्य कुलपतिचराः प्रो. नीलकण्ठपतिमहाभागाः सम्मानितातिथिरूपेण चासन्। विभागमुख्याः डॉ. शम्भुनाथमहालिकमहोदयाः स्वागतभाषणमददन्, डॉ. भगवान-सामन्तरायमहोदयाः सङ्गोष्ठीं समचालयन्। अस्यां पञ्चचत्वारिंशच्छोधपत्राणि पत्रवाचकैः उपस्थापितानि।

२०१७ फरवरीमासस्य ९ दिनाङ्के अपराह्णे श्रीशङ्करविशिष्टव्याख्यानमालायाः पञ्चमं पुष्पं विकासयितुं राष्ट्रियसंस्कृतसंस्थानस्य परीक्षानियन्त्रकाः प्रो. सुकान्तकुमारसेनापतिमहोदयाः समागताः। तत्र अद्वैतवेदान्ते वृत्त्यवधाराणेति विषयमुररीकृत्य विशिष्टं व्याख्यानं प्रो. सेनापतिमहोदयैः प्रदत्तम्।

### नव्यन्यायविभागीयकार्यक्रमाः

२०.०२.२०१७ दिनाङ्कतः २१.०२.२०१७ यावत् आत्मतत्त्वविमर्शः इति विषयाधारेण द्विदिवसीया राष्ट्रियसङ्गोष्ठी अभूत्। तत्र श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिचराः प्रो. नीलकण्ठपतिमहोदयाः उद्घाटकाः, गङ्गानाथझापरिसरस्य प्राचार्यचराः प्रो. किशोरनाथझामहोदयाः मुख्यातिथयः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य आचार्याः प्रो.कमलेशमिश्रमहोदयाः मुख्यवक्तारः, परिसरस्य प्राचार्याः प्रो. अतुलकुमारनन्दमहोदयाः अध्यक्षाः आसन्। किञ्च २०१७ फरवरी २१ दिनाङ्के अपराह्णे "न्यायशास्त्रीयभाषापद्धतिः" इति विषये विशिष्टव्याख्यानं समायोजितम्। तत्र गङ्गानाथझापरिसरस्य प्राचार्यचराः प्रो. किशोरनाथझामहोदयाः विशिष्टव्याख्यानमयच्छन्। परिसरस्य सर्वे अध्यापकाः पत्रवाचकाः विभागीयाध्यापकाः विभागीयच्छात्राश्च समुपस्थाय सङ्गोष्ठीमिमां सफलीकृतवन्तः।

### सांख्ययोगविभागीयकार्यक्रमाः

विभागपक्षतः विशिष्टव्याख्यानमाला १४ फरवरी २०१७ तमे दिनाङ्के अभवत्। पुनः विभागपक्षतः द्विदिवसीयजातीयालोचनाचक्रं १४ तः १५ फरवरी २०१७ दिनाङ्कपर्यन्तं शास्त्रान्तरेषु सांख्यतत्त्वविचारः इति विषयमधिकृत्य अभूत्। कार्यक्रमेऽस्मिन् श्रीजगन्नाथ-संस्कृतविश्वविद्यालयस्य वेदान्तविभागाध्यक्षाः प्रो. प्रभातरञ्जनमहापात्रमहोदयाः मुख्यातिथयः, तस्यैव विश्वविद्यालयस्य सर्वदर्शनविभागमुख्याः प्रो.प्रलयकुमारनन्दमहाभागाः विशिष्टातिथयः, परिसरप्राचार्याः प्रो. अतुलकुमारनन्दमहोदयाः अध्यक्षाश्चासन्। तत्र विभिन्नस्थानेभ्यः चत्वारिंश-

दधिकशोधपत्रवाचकाः भागं गृह्णन्तः शास्त्रान्तरेषु सांख्यतत्त्वविमर्शः इति विषये आलोचनं कृतवन्तः। विभागमुख्यानां डॉ. अशोककुमार-मीनामहोदयानां तत्त्वावधाने सर्वमपि कार्यं सम्पन्नम्। सर्वे विभागीयाचार्याः सहयोगं दत्तवन्तः।

## ज्यौतिषविभागीयकार्यक्रमाः

२६.०२.२०१७ दिनाङ्कतः २७.०२.२०१७ यावत् विज्ञानसम्मतं ज्योतिषशास्त्रमिति विषयमभिलक्ष्य द्विदिवसीया राष्ट्रिया सङ्गोष्ठी अभूत्। तत्रोद्घाटनसत्रे हिमाचलप्रदेशस्थवेदव्यासपरिसरस्य ज्योतिषविभागाध्यक्षाः डॉ. पी.वी.बी.सुब्रह्मण्यमहोदयाः मुख्यातिथयः, परिसरप्राचार्याः प्रो. अतुलकुमारनन्दमहोदयाः अध्यक्षाश्चासन्। तस्यां सङ्गोष्ठ्यां त्रिंशताधिकाः शोधपत्रपाठकाः विषयसम्मतं पत्रवाचनं कृतवन्तः। २०१७ फरवरी २७ दिनाङ्के अपराह्णे ज्योतिषशास्त्रे भूकम्पविचारः इति विषयोपरि विशिष्टव्याख्यानमाला आयोजिता। तत्र विशिष्टवक्तृरूपेण काशीहिन्दूविश्वविद्यालयस्य ज्योतिषविभागाध्यापकाः डॉ. शत्रुघ्नत्रिपाठिमहाभागाः समुपस्थाय सारगर्भकं तत्त्वमुपास्थापयन्। तस्मिन् कार्यक्रमे विभागमुख्याः सर्वे अध्यापकाः छात्राश्च समुपस्थिताः आसन्।

## आधुनिकविभागीयकार्यक्रमाः

आधुनिकविभागे सत्रेऽस्मिन् २७.०२.२०१७ दिनाङ्कतः २८.०२.२०१७ यावत् श्रीजगन्नाथपरम्परायां साहित्य-दर्शन-अर्थशास्त्र-सामाजिक-प्रबन्धमानचित्रम् इति विषयमधिकृत्य द्विदिवसीयजातीयालोचनचक्रम् अभवत्। अस्याः सङ्गोष्ठ्याः उद्घाटनवसरे राष्ट्रियसंस्कृत-संस्थानस्य परीक्षानियन्त्रका प्रो.सुकान्तकुमारसेनापतिमहाभागाः मुख्यातिथयः, तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिचराः प्रो. हरेकृष्णशतपथिमहोदयाः उद्घाटकाः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलसचिवाः प्रो. रमेशचन्द्रमिश्रमहोदयाः सम्मानितातिथयः, उत्कल-विश्वविद्यालयस्यावसरप्राप्ताः इतिहासविभागाचार्याः प्रो.हिमांशुशेखरपट्टनायकमहोदयाः विशिष्टातिथयः, परिसरस्य आचार्याः प्रो. अतुलकुमारनन्दमहोदयाः अध्यक्षाश्चासन्। परिसरस्य इतिहासविभागाध्यापकस्य श्रीदुर्गाप्रसाददासमहोदयस्य संयोजने विभिन्नराज्येभ्यः पञ्चाशदधिकाः शोधपत्रपाठकाः गवेषकाश्च भागं गृहीत्वा श्रीजगन्नाथसंस्कृतेः रहस्यं प्राकटयन्।

२०१७ फरवरी २७ तमे दिनाङ्के विशिष्टव्याख्यानमाला आधुनिकच्छात्रसमाजे नैतिकशिक्षायाः मूल्यबोधः इति विषयाधारेण सङ्घटिता। तत्र चिन्मयमिशन् इति संस्थायाः स्वमिनः श्रीसदानन्दसरस्वतीमहोदयाः साम्प्रतिकसमाजे नैतिकशिक्षाद्वारा छात्राः समाजं निर्मातुं सक्षमाः इति अभिभाषणं प्रायच्छन्। कार्यक्रमेऽस्मिन् परिसराध्यापकाः छात्राश्चोपस्थिताः।

## शिक्षाशास्त्रविभागीयकार्यक्रमाः

०२.०३.२०१७ तः ०३.०३.२०१७ दिनाङ्कपर्यन्तं शिक्षाशास्त्रविभागे द्विदिवसीया राष्ट्रियसङ्गोष्ठी आयोजिता। एतस्याः सङ्गोष्ठ्याः उद्घाटनसत्रे श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य शिक्षाशास्त्रविभागाध्यक्षाः प्रो. आर्.पी.पाठकमहोदयाः, नलिनीदेवीमहिलाशिक्षक-प्रशिक्षणमहाविद्यालयस्य प्राचार्याः प्रो. रबिप्रियामहोदयाः मुख्यातिथिरूपेण समुपस्थिताः आसन्। तथा च अस्यां सङ्गोष्ठ्यां पञ्चसत्राणां संचालनमभवत्, येषु विविधप्राध्यापकैः, शोधच्छात्रैः, शिक्षाचार्यशिक्षाशास्त्रिच्छात्रैश्च स्वीयविशिष्टानि शोधपत्राणि प्रस्तुतानि। कार्यक्रम-स्यास्य समापनसत्रे सम्मानितातिथिरूपेण श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिचराः प्रो. गङ्गाधरपण्डामहोदयाः, मुख्यवक्तृरूपेण केन्द्रियहिन्दीसंस्थानस्य प्राचार्याः प्रो. लक्ष्मीधरदाशमहोदयाः, मुख्यातिथिरूपेण संस्कृतभारती उत्कलप्रान्तस्य प्रमुखाः डॉ.नृसिंहचरण-पण्डामहोदयाः च उपस्थिताः अभवन्। अस्यां सङ्गोष्ठ्याम् आध्यक्ष्यं परिसरप्राचार्यैः प्रो. अतुलकुमारनन्दमहोदयैः अलंकृतम्। अस्याः सङ्गोष्ठ्याः संयोजकत्वेन डॉ. रमाकान्तमिश्रमहोदयाः आसन्। एतस्याः सङ्गोष्ठ्याः सर्वमपि मार्गदर्शनं विभागमुख्यैः प्रो. विजयपालमहोदयैः विहितम्। अस्मिन् कार्यक्रमे विभागस्य अन्ये प्राध्यापकाः सोत्साहं प्रतिभागं कृतवन्तः।

## वार्षिकोत्सवः

प्रतिवर्षमिव ऐषमोऽपि १७ फरवरी २०१७ दिनाङ्के रेभेन्शाविश्वविद्यालयस्य महामहिमकुलपतयः प्रो. प्रकाशचन्द्रषडङ्गिमहोदयाः मुख्यातिथयः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य महनीयकुलपतयः प्रो.राधामाधवदाशमहोदयाः मुख्यवक्तारः, परिसरस्यास्य प्राचार्याः प्रो. अतुलकुमारनन्दमहोदयाः सभाध्यक्षरूपेणोपस्थाय सोल्लासेन च वार्षिकोत्सवकार्यक्रममुं सफलीकृतवन्तः। अवसरेऽस्मिन् परिसरीयाध्यापकाः कर्मचारिणः साम्वादिकाः छात्राश्चोपस्थिताः। वार्षिकोत्सवावसरे लोकार्पिताः प्रत्येकं विभागस्य शोधपत्रिकाः।

## प्राचार्यस्य महामहिमराज्यपालेन सम्मानम्

२९.०३.२०१७ दिनाङ्के भारतस्काउटगाईडपक्षतः उत्कलराज्यसर्वकारः प्रतिवर्षमिव ऐषमः ओडिशाराज्यस्य राज्यपालभवने सभां विधाय परिसरस्य भारतस्काउटगाईडकृते महद् योगदानं संवीक्ष्य परिसरप्राचार्यस्य प्रो.अतुलकुमारनन्दमहोदयस्य ओडिशाराज्यमहामहिमराज्यपाल-महाभागैः सम्मानः कृतः।

## नाट्यमहोत्सवे अभिनीतानां रूपकाणां कानिचन चित्राणि



# राष्ट्रियसंस्कृतसंस्थानम्

**( राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः,**
**भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः )**
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058

राष्ट्रियसंस्कृतसंस्थानेन वास्तुयोगायुर्वेदविषयाणां प्रोत्साहनाय वास्तुयोगायुर्वेद-पिपठिषूणां कृते एकवर्षीयः वास्तुयोगायुर्वेदपाठ्यक्रमः समारब्धः अस्ति–

**१. वास्तु डिप्लोमा कोर्स**

**२. योग एवम् आयुर्वेदसाहित्य डिप्लोमा कोर्स**

**प्रवेशस्य सामान्यनियमाः**

१. प्रवेशार्थम् अभ्यर्थी संस्कृतविषयेण सह सीनीयर् सैकेण्डरी (+२) अथवा तत्समकक्षायाम् अनिवार्यतया उत्तीर्णः भवेत्।

२. संस्कृतभाषयैव पाठ्यक्रमस्य पठनं पाठनं च भवति।

३. निर्धारितपाठ्यक्रस्य प्रवेशार्थं ४० स्थानानि निर्धारितानि भवन्ति। तत्र ३० स्थानानि पारम्परिकधाराच्छात्राणां, १० स्थानानि आधुनिक- धाराच्छात्राणां कृते निर्धारितानि।

वास्तु-डिप्लोमा कोर्स राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरे, राजीवगान्धी-परिसरे, योग एवम् आयुर्वेदसाहित्य-डिप्लोमा कोर्स जयपुरपरिसरे गुरुवायूरपरिसरे च प्रवर्तते।

अधिकनियमान् www.sanskrit.nic.in द्रष्टुं शक्यते।

**–कुलसचिवः**

Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.IX Issue No.35 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007